In Public domain. Digitization Muthulakshmi Research Academy

74

(25)

74

श्रीमनोन्मनीग्रन्थमाला कुसुमम् - ६

आगमरहस्यम्

(वातूलशुद्धाख्यम्)

प्रकाशकः

श्रीमनोन्मनीग्रन्थमालाप्रकटनमन्दिरम्

बेंगलूरु

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

RE 12·7 38

TANT 117 74

श्रीमनोन्मनीग्रन्थमालाकुसुमम्—६

आगमरहस्यम्

(वातूलशुद्धाख्यम्)

✲

प्रकाशकः

तलकाडु आगमिक कृष्णदीक्षितः

Senior Agama Pandit,

Endowments Commissioner's Office,

Bangalore.

✲

मूल्यं रूप्यकद्वयम्

In Public domain. Digitization Muthulakshmi Research Academy

प्रथममुद्रणम् १९५८
श्रीविळंबिसंवत्सरः

अस्य सर्वेऽधिकाराः प्रकाशकैः स्वायत्तीकृताः

प्रभामुद्रणालयः
बेंगळूरु-४

अग्रलेखनम्

समुपजोषमद्य प्रकाश्यते शैवागमान्तर्गतः वातूलशुद्धाख्य-ग्रन्थः। आगमो नाम परमकारुणिकेन भगवता लोकहितकाम्यया समुपदिष्टः ग्रन्थविस्तारः। वेदा इव आगमा अपि प्रमाणभूता एवेत्यत्र न कोपि सन्देहः। आगमास्तावत् शैव, शाक्त, वैष्णव-भेदेन त्रिधा विभक्ताः, भिन्ना अपि भगवदाराधनप्रकारनिरूपण-रूपमन्त्रतन्त्रात्मकत्वात् समानोद्देशाः। तेषु शैवागमाः कामिक-कारणादि वातुलान्ताः अष्टाविंशतिधा वर्तंते॥ तत्र अन्तिमो वातुलागमः परमशिवेन स्कंदायोपदिष्टः॥

अयं च ग्रन्थः आगमशास्त्रकोविदैः आगमतिलकेत्यन्वर्थोप-पदैः ब्र. श्री कृष्णदीक्षितैः महता प्रयासेन सम्पादितानां ताल-पत्रादिमातृकाणां समाकलनेन मुद्रयित्वा प्राकाश्यतां नीत इत्यहो महानयमुपकारः श्रीमतां भक्तसमुदायायेति सादरमावेद्यते॥

एते तावत् कलिमलध्वंसिनी श्री कावेर्याख्यपवित्रनदी परिवृते दक्षिणकाशीति पुराणप्रथिते, गजारण्यमिति सुप्रसिद्धे (तलकाडु) पुण्यक्षेत्रे सुमहिते आगमिककुले लब्धजनुषः, तथा च अनुष्ठानदक्षेभ्यः ब्र· श्री एकाम्रदीक्षितेभ्यः समधिगतविद्याः, तस्मिन्नेव पुण्यतीर्थपवित्रीकृतदेवतासन्निधौ त्रिंशत्वर्षपरिमित-कालं स्वयं तीव्रानुष्ठानाधिगतसवीर्यमन्त्राः अस्य ग्रन्थस्य संकलने बद्धादरा इति हेम्नः परमामोदः। ग्रन्थपरिष्करण मुद्रणादि परिश्रमः, अध्येतॄणां पाठप्रवचनादिसौकर्यापादनेन सफलता-माप्नोतीति विस्रब्धं प्रतीमः॥

अस्मिन् दशपटला वर्तंते। प्रथमे तावत् तत्त्वभेदपटले—परमेश्वरस्य परापरमूर्तित्वं कथितम्। कर्षणादिप्रतिष्ठांतानि ईश्वरस्य कर्ममूर्तौ कार्याणि। महेश्वरस्य निष्कलत्वेपि सगुण-रूपेणैव पञ्चविंशतिलीलामूर्तित्वांगीकारः। पञ्चाशत्कोटिदेवानां

In Public domain. Digitization Muthulakshmi Research Academy

महेश्वरांशात्समुद्भूतिः, परमशिवस्य शक्तिभेदः, त्रिमूर्त्यात्मकत्वं च वर्णितम् ।

द्वितीये वर्णभेदपटले—अकारादिक्षकारान्तानां वर्णानामाकृतिं, स्वरूपं, बीजत्वं च वर्णितं यतः वर्णसमूहः सर्वार्थसिद्धिदः स्यात् ॥

तृतीये चक्रभेदपटले—मंत्रबोधनसमर्थानि चक्ररूपाणि सर्ववर्णात्मकानि, सर्वदेवप्रियार्थानि निरूपितानि । तथा तेषां स्थानानि, कर्तृनियमाः, चक्रोद्धारक्रमः, देवतान्यासः वर्णन्यासश्च उक्ताः ॥

तृतीये वर्गभेदपटले—सृष्टि-स्थिति-संहारवर्गक्रमेण चक्रन्यासः, प्रासादादिमंत्राणां वर्गभेदो वर्णभेदश्च निरूपितः ॥

पंचमे मंत्रभेदपटले—मन्त्रशब्दार्थनिर्वचनं, प्रासादादिशब्दनिर्वचनं, सदाशिवमहेशादिपञ्चशक्तिनिरूपणं च वरीवर्ति ॥

षष्ठे प्रणवभेदपटले—प्रणवस्य सर्वदेवमयत्वं, पंचविधभेदानां पंचवक्त्रोद्गतत्वं च वर्णितम् ॥

सप्तमे ब्रह्मभेदपटले—ब्रह्मणः पंचधा, पंचविंशतिधा विभागः पंचब्रह्मलक्षणं, अष्टात्रिंशत्कलानां पंचब्रह्मविभागे समन्वयश्च विशदीकृतः ॥

अष्टमे अंगभेदपटले—शिवांग, भूतांग, विद्यांग, कूटांग, शक्त्यंग, सामान्यंगानां तथा पंचास्त्राणां विवरणं, मंत्रस्वरूपकथनं च दरीदृश्यते । तथा शिवशक्त्योः चक्रोद्धारः, मन्त्रविन्यासः, भुवनाध्व, पदाध्व, वर्णाध्व, कलाध्व, तत्वाध्व, मन्त्राध्वेति षडध्वन्यासविवरणं च विशदीकृतम् ॥

नवमे मन्त्रजातपटले—अतिबालाद्येकोनविंशतिमंत्राः, मंत्राणां शुद्ध-मिश्र-संकीर्णरूपेण त्रिधा विभागः, मंत्रवासः—मंत्रवाहनं चैवं मन्त्रजातस्य लक्षणमस्मिन् पटले नवदशधेति स्पष्टीकृतम् ॥

दशमे तावत् मन्त्रकीलपटले—सामान्य, मिश्र, शुद्ध, वीराख्य चतुर्विधशैवलक्षणं विशेषतः वीरशैवलक्षणं च उपवर्णितम् ॥

कौशिक, काश्यप, भरद्वाज, गौतमागस्त्य गोत्रजातानां सद्योजातादिपंचवक्त्रदीक्षितत्वं संसूचितम् । अतस्तेषां आत्मार्थपरार्थोभयविधाराधनाधिकारः सहजत्वेन निर्णीतः ॥

तथैवैतेषां परमेश्वरादारभ्य पारंपर्येण शिवदीक्षायाः (रहस्य मंत्र-तंत्रोपदेशानुष्ठानादीनां) स्वतस्सिद्धत्वात् पुनर्दीक्षा स्वीकरणस्य आवश्यकता न सम्भवत्येव ॥ यथा—

'एषां ऋषीणां वंशे हि जातस्ते वै शिवद्विजाः ।
पुनर्दीक्षां न चार्हंति, कृतश्चेदपि निष्फलः ॥' इति ॥

एतेषां कौशिकादिपंचगोत्रजानां शैवागमिकानामेव आचार्यमुखेन (जनकेन) परंपराप्राप्तसंप्रदायक्रमेण ब्रह्मोपदेशवेळायां शिवगायत्र्यादिसिद्ध महामन्त्रोपदेशो विहितः ॥

ते द्वादशमहामन्त्राश्च क्रियासारे एवं निर्दिष्टाः—

"प्रासादं, प्रणवं, हंसं, व्योमव्यापि शिवाक्षरम् ।
अघोरं, दक्षिणामूर्तिं, मृत्युंजयमतःपरम् ॥
श्रीरुद्रं परमं चैव, श्रीमत्पंचाक्षरं परम् ।
अघोरास्त्रं, शिवास्त्रं च, तथा पाशुपतास्त्रकम् ॥
द्वादशैते महामन्त्राश्शिवमन्त्रोत्तमोत्तमाः ॥" इति ॥

एवमादिमहिमोपेतैः प्रकाशितस्यास्य ग्रन्थस्य प्रतिपाद्यविषयमहिम्ना अमूल्यतां दृष्ट्वा, धीमन्तोऽस्य पाठप्रवचनादिना मुद्रणपरिष्करणादिश्रमं सफलयेयुरित्याशास्महे ॥

ता० 1-5-1958
Mysore.

N. Mallikarjuna Sastry
(एन् . मल्लिकार्जुनशास्त्री)
Principal,
Maharaja's Samskrita College, Mysore.

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

॥ श्रीः ॥

भूमिका

स शिवः स्वमुखोद्भूतैरागमैस्तु परापरैः ।
अनुगृह्णाति हि जगद्भोगमोक्षप्रसिद्धये ॥

स्वायम्भुवे—

अथात्ममलसन्तानपशुत्वविनिवृत्तये ।
व्यक्तये च शिवत्वस्य शिवाज्ज्ञानं प्रवर्तते ॥
तदेकमप्यनेकत्वाच्छिववक्त्राम्बुजोद्भवम् ।
परापरविभेदेन गच्छत्यर्थप्रतिश्रयात् ॥
परैः शैवादिभिर्दिव्यैरागमैः पाशमोचकैः ।
विशिष्टभोगविभवशिवत्वफलदायिभिः ॥
अपरैरपि वेदाद्यैरागमैस्स्वमुखोद्गतैः ।
स्वर्गादिफलसिध्यर्थं पशुज्ञानप्रकाशकैः ॥
तत्र पूर्वं तु शैवाख्यं तन्त्रं शिवमुखोद्गतम् ।
शुद्धशैवमितिख्यातं शुद्धतत्वसमाश्रयात् ॥
निष्कलो हि शिवो वक्ति कथं वाक्यादिलक्षणान् ।
आगमानिति चोद्येऽस्मिन् दृष्टं स्वंशाब्दलक्षणम् ॥
निष्कलो ह्येष मन्त्रात्मा विद्यादेहं समास्थितः ।
विसृजत्यागमान् सृष्टौ स्ववक्त्रेणात्मगोचरान् ॥
एकमेवशिवज्ञानं विभिन्नं दशधा पुनः ।
तथाष्टादशधा भूयो भेदान्तरविसर्पितम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

किरणे—

पुंसामनुग्रहार्थं तु परोऽप्यपरतां गतः।
कृत्वा मन्त्रात्मकं देहं वक्ति तन्त्राण्यनेकधा ॥

शैवागमस्य भेदास्स्युः प्रथमं कामिकादयः।
ततश्चाष्टदशविधा भेदास्स्युर्विजयादयः ॥

विंवागमे—

कामिकं योगजं चिन्त्यं कारणं त्वजितं तथा।
दीप्तं सूक्ष्मं च साहस्रमंशुमान्सुप्रभेदकम् ॥
विजयं चैव निःश्वासं स्वायम्भुवमथानलम्।
वीरं च रौरवं चैव मकुटं विमलं तथा।
चन्द्रज्ञानं च विम्बं च प्रोद्गीतं ललितं तथा ॥
सिद्धं सन्तानशर्वोक्तं पारमेश्वरमेव च ॥
किरणं वातुलं चेति त्वष्टाविंशतिसंहिताः।
तेषु पूर्वं दश प्रोक्ताश्शिवभेदेति कीर्तिताः ॥
सद्योजातमुखाज्जाताः पंचाद्याः कामिकादयः।
वामदेवमुखाज्जाताः दीप्ताद्याः पंचसंहिताः ॥
अघोरवक्त्रादुद्भूताः पञ्चापि विजयादयः।
पुंवक्त्रादपिचोत्पन्नाः पंच वै रौरवादयः ॥
ईशानवदनाज्जाताः प्रोद्गीताद्यष्टसंहिताः ॥

इत्यादिप्रमाणवचनैः परमकारुणिको भगवान् परमेश्वरः समस्तस्य जगतो भोगमोक्षप्रसिद्ध्यर्थं 'परा'–'अपरा' भेद-

भिन्नान् आगमाननुपदिदेशेत्यवगम्यते। तत्र सुविशदसंस्कृतभाषायां उपदिष्टवाङ्मयविभागः "आगमाः" इति जेगीयन्ते। अस्मिन् संप्रदाये इमे 'परा' इति परिभाष्यन्ते। अपरो विभागः वेद-वाङ्मयमिति विवेकः।

अशेषं पशुनिकायं तदावरकमायापाशमपोह्य समुद्दिधीर्षुणा शंकरेण सद्योजातादिवक्त्रचतुष्टयेन प्रत्येकं पञ्चसंहिताः, तथैव ईशानाख्येन च पञ्चमेन वदनेन अष्टौ संहिताः, आहत्य अष्टाविंशति संहितात्मिका शुद्धशैवतत्वप्रतिपादिका विद्या उपदिष्टा अभूवन्।

इमे 'सिद्धान्ताख्याः शिवागमाः' इति वचनात् 'सिद्धान्ता' इति च गीयन्ते। कामिकादिवातुलान्तेषु एतेषु अष्टाविंशत्यागमेषु अन्तिमो वातुलागमः—('वातुलं वदनं प्रोक्तं'–'वातुलं वसनं प्रोक्तम्') इति च उपश्लोकितो वर्तते। निष्कलो हि परमेश्वरः विद्यादेहवान् वातुलागमवदनो, वातुलागमवसनो वा विभातीति इदमेव अस्य आगमस्य उत्कर्षकारणमिति निश्चप्रचम्।

आगमपरिमाणगणनावसरे 'वातूलं दश साहस्रं' इति अभिज्ञैः ग्रन्थसंख्या निर्दिष्टा। तथापि अयमागमः नेदानीं सम्पूर्णः समुपलभ्यते। किंतु, तत्र तत्र ताळपत्रपुस्तकेषु भागश एव उपलभ्यमानो वर्तते।

वातुलाख्ये महातन्त्रे दध्नो घृतमिवोद्धृतम्।
सारात्सारं समुद्धृत्य शुद्धाख्यं तन्त्रमुत्तमम्।

सहस्रग्रन्थसंयुक्तं सर्वज्ञानसमुच्चयम्।
गुह्याद्गुह्यमिदं तन्त्रं सर्वशास्त्रसमुद्धृतम्।

सूक्ष्मात्सूक्ष्मतरं चैव सारात्सारं महोदयम्।
अप्रकाश्यमिदं तन्त्रं रहस्यं परदुर्लभम् ॥ इति ॥

In Public domain. Digitization Muthulakshmi Research Academy

वातुलागमदध्नो घृतमिवोद्धृतं, सारतरं, शुद्धाख्यं तन्त्रं- "आगमरहस्यं" परमेश्वरः स्वपुत्राय षडाननाय उपदिदेश। अस्मिन् तन्त्रे प्रतिपादिताः अर्थाः दीक्षावद्भिः संप्रदायविद्भिः आचार्यैरुपदिष्टा महते फलाय प्रभवन्ति; अन्यथा याथात्म्यबोधः न भवेदपि।

अत्रत्यः 'मन्त्रजातपटलाख्यो' नवमः पटलः मन्त्रग्रामात्मको वर्तते। तस्मात् अनुष्ठानवद्भ्यः सकाशादेव क्रमविशेषा अधिगन्तव्या भवन्ति, चक्रोद्धारः, बीजाक्षरविन्यासः, मन्त्रोपासना प्रकारादयः सदनूचानसम्प्रदायसिद्धगुरूपदेशादेव सरहस्यं ज्ञातुं शक्यन्ते। अत एवायं पटलः इतरविभाग इव पठ्यपुस्तकेषु प्रश्न-प्रतिवचन-विषये अन्वयं नार्हति। अनुष्ठानैकसमधिगम्या विषयाः पठ्य-पुस्तकेषु उपवर्णिताऽपि, अध्यापकैः अध्येतृभिश्च मानयितव्या भवन्ति॥

अस्य ग्रन्थस्य परिष्करणादिकार्ये चिरकालात्प्रवृत्तोऽपि अपेक्षितशुद्धसमग्रमातृकाद्यलाभेन नाद्याऽपि यथावन्निष्पन्नोयं प्रयत्नः इति निवेदयामि। सहृदयाः यदि शुद्धमातृकां परिपूर्णां उदार-बुद्ध्या प्रापयेयुः, तदा आयत्यां परिष्कृतप्रकटने सहायं कुर्युरेव।

अस्य ग्रन्थस्य प्रकटनार्थं मूलमातृकादानेन उपकृतवतां आगमानुष्ठानदक्षाणां श्रीसुब्रायदीक्षितानां, आगमाचार्याणां श्री नारायणदीक्षितानां च (Chamundi Hills, Mysore) नितरां कृतज्ञोऽस्मि। तथैव अस्य प्रकटने बहुमुखेन उपकृतोऽस्मि मित्र-वृन्देन, तेभ्यः धन्यवादानुपहारीकरोमि॥

आदितः श्री जि. एन्. नागराजराव् महोदयाः (Sri G. N. Nagaraja Rao, I.A.S. the then Muzrai Commissioner, now Divisional Commissioner, Gulbarga) सर्वकारद्वारा आर्थिक-सहायदापनेन 'श्रीशैवसिद्धान्तपरिभाषा' 'आगमरहस्यम्' इति एतयोः प्रकाशने प्रोदसाहयन्।

इमौ पठ्यपुस्तकपङ्क्तौ अङ्गीकृत्य, आगमविद्याशिक्षणपरीक्षा-महासभासदस्याः, तथा मान्य अध्यक्षाः विद्यारत्न श्री के. गुरुदत्त महोदयाश्च (Sri K. Guru Dutt, I.A.S. Retd. D.P.I. and Chairman, Advisory Committee for Agama Studies and Examinations in Mysore and President, Agamathraya Mahamandala, Bangalore.) अन्वगृह्णन्॥

वैदिकधर्माचार्याः, विद्याभूषणं, आचाररत्नं साहित्यमणिः ब्र. श्री एन्. मल्लिकार्जुनशास्त्रिणः (Sri N. Mallikarjuna Sastry, M.A., Principal, Maharaja's Sanskrit College, Mysore and Vice-President, Agamathraya Mahamandala, Bangalore) सर्वास्ववस्थासु सर्वदा सहकारमातन्वन्। एतेभ्यस्सर्वेभ्यः महाशयेभ्यः अस्मिन्नवसरे सप्रश्रयं कृतज्ञतामावेदयामि॥

श्रीविळंबिसंवत्सरे भाद्रपदशुद्ध
चतुर्थ्यां स्वातीयुतः—सौम्यवासरः
(17—9—1958)
'श्री मनोन्मनीकृपा'
कल्याणनगरी.

इति सुधीविधेयः
तलकाडु आगमिक कृष्णदीक्षितः
Agamika Krishna Deekshit,
Senior Agama Pandit,
Endowments Commissioner's Office,
Bangalore.

In Public domain. Digitization Muthulakshmi Research Academy

कृतज्ञतास्मरणम्

I महतः ग्रन्थस्यास्य मुद्रणविषये आधारतया उपयुक्तानां प्राचां तालपत्रात्मकपुस्तकानां प्रदानेन उपकृतवन्तौ महोदयौ—

१. आगमानुष्ठानदक्षाः आगमिक सुब्रायदीक्षिताः,
Chamundi Hills, Mysore.

२. आगमाचार्याः आगमिक नारायणदीक्षिताः,
Chamundi Hills, Mysore.

II ग्रन्थस्यास्य परिष्करणे ग्रन्थपाठशोधनविषये च उपयुक्ते पुस्तके—

१. मैसूरु प्राच्यसंशोधनकोशागारस्थे आंध्र-ग्रन्थलिप्यात्मकताळपत्रपुस्तके,

२. मैसूरु श्रीमन्महाराजास्थान सरस्वतीभाण्डागारस्थं कर्णाटकलिप्यात्मकं ताळपत्रपुस्तकम् .

३. मद्रास् नगर शिवज्ञानबोधयन्त्रालये प्रकटितं ग्रन्थलिपिमुद्रितपुस्तकम् .

III हस्तप्रतिलेखनादिषु सहकारिणः महाभागाः—

१. विद्वांसः ए. आर्. सुंदरेशन्, बेंगलूरु.

२. श्रीमंतः वि. श्रीनिवासाचार्याः, प्रभा मुद्रणालयः, बेंगलूरु.

३. विद्वांसः एस्. रंगनाथन्, मैसूरु.

IV पाठांतरसंशोधने हस्तलिखितप्रतिपरिष्करणे च अस्माकं स्कंधे स्कंधं निधाय सहकृतवंतः—

१. पण्डितप्रवराः, विद्वांसः, शृंगगिरि कवि नरसिंहभट्टाः, बेंगलूरु.

२. विद्वांसः के. सीतारामसोमयाजिनः, मैसूरुश्रीमन्महाराजसंस्कृतमहापाठशालाशैवागमप्राध्यापकाः.

३. शैवागमपण्डितवराः एस्. सुब्बकृष्णदीक्षिताः, मैसूरु श्रीमन्महाराजसंस्कृतमहापाठशालाशैवागम सहायप्राध्यापकाः.

V ग्रन्थस्यास्य मुद्रणावसरसंजातसर्वसंशयनिवारणेन, परिष्करणेन च सहकृतवंतः, अग्रलेखनप्रदानेन प्रोत्साहितवंतश्च—

वैदिकधर्माचार्याः, विद्याभूषणं, आचाररत्नम्, साहित्यमणिः एन्. मल्लिकार्जुनशास्त्रिणः, एम्.ए. महाभागाः, Principal, Maharaja's Samskrita College, Mysore.

एतेषां महोदयानां महोपकारमभिनन्दनपूर्वकं सादरं स्मरामः कृतज्ञतास्मरणेनेति शिवम् ।

संपादकाः प्रकाशकाश्च.

In Public domain. Digitization Muthulakshmi Research Academy

|| श्रीः ||

नमस्तस्मै गणेशाय ब्रह्मविद्याप्रदायिने ।
यस्यागस्त्यायते नाम विघ्नसागरशोषणे ॥

मनोन्मनीमातृकया समेते श्रीवैद्यनाथेश्वरसार्वभौमे ।
हृदि स्थिते मे किमु वांछितार्थः न लभ्यते दैविकमानुषेषु ॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

समर्पणम्

कलिमलध्वंसिनी श्रीमत्कावेरीगोकर्णतीर्थसुविलस-
दक्षिणकाशीति विख्यात (तलकाडु) श्रीगजारण्यक्षेत्राधीश्वरस्य
शरणागतवत्सलस्य श्रीमनोन्मनीमानसवल्लभस्य
श्रीवैद्यनाथेश्वरस्य चरणनळिनयोः
श्री मनोन्मनीग्रन्थमालायाः
षष्ठं कुसुममिदं समर्पितम्
विजयतेतराम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

॥ श्रीः ॥

अनुक्रमणिका

क्रमसंख्या	पटलानां नामानि	पुटसंख्या	ग्रन्थसंख्या
१	तत्त्वभेदपटलः	१	१४७
२	वर्णभेदपटलः	१७	७५
३	चक्रभेदपटलः	२५	४०+१
४	वर्गभेदपटलः	३०	४५+॥
५	मन्त्रभेदपटलः	३५	११५
६	प्रणवभेदपटलः	४७	२५+॥
७	ब्रह्मभेदपटलः	५०	७६+२
८	अङ्गभेदपटलः	५८	१०७+२
९	मन्त्रजातपटलः	६९	११०
१०	मन्त्रकीलपटलः	८१	६१
		आहत्यश्लोकाः	८०९

॥ शिवं भूयात् ॥

॥ श्रीरस्तु ॥

॥ शिवाभ्यां नमः ॥

॥ वातुलागमे तत्त्वभेदपटलः ॥

वंदे शंकरमाप्तमध्यममलं तेजोनिधिं शाश्वतम्
विंदुक्षोभकरं परात्परतरं नादात्मकं वीजिनम् ।
सर्वान्तस्थमनेकलोकजनकं सोमं जगत्प्रेरकम्
लिंगस्थं बहुमंत्रमंत्रितमहालिंगं लयाख्यं ध्रुवम् ॥

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ॥ १ ॥

तत्र सिंहासनासीनं श्रीकण्ठं त्रिदशेश्वरं ।
प्रणम्य चरणौ तस्य स्कन्दो वचनमब्रवीत् ॥ २ ॥

देवदेव जगन्नाथ सर्वज्ञ त्रिपुरांतक ।
स्थित्युत्पत्तिलयेशान प्रणतार्तिहर प्रभो ॥ ३ ॥

सर्वलोकहितार्थाय योगिनां रक्षणाय च ।
मन्त्रं तन्त्रं पुरा देव त्वया प्रोक्तं तु विस्तरात् ॥ ४ ॥

पुंसामनुग्रहार्थाय ज्ञानिनां मुक्तिकारणं ।
शिवज्ञानं परं गुह्यं संक्षेपाद्वद मे प्रभो ॥ ५ ॥

In Public domain. Digitization Muthulakshmi Research Academy

॥ ईश्वर उवाच ॥

अथातस्संप्रवक्ष्यामि यत्त्वया परिचोदितम् ।
तत्सर्वं हि समासेन श्रूयतामपि षण्मुख ॥ ६ ॥

साधकानां हितार्थाय भुक्तिमुक्तिप्रदायकं ।
वातुलाख्ये महातन्त्रे दध्नो घृतमिवोद्धृतम् ॥ ७ ॥

सारात्सारं समुद्धृत्य शुद्धाख्यं तन्त्रमुत्तमम् ।
सहस्रग्रन्थसंयुक्तं सर्वज्ञानसमुच्चयम् ॥ ८ ॥

गुह्याद्गुह्यमिदं तन्त्रं सर्वशास्त्रसमुद्धृतम् ।
सूक्ष्मात्सूक्ष्मतरं चैव सारात्सारं महोदयम् ॥ ९ ॥

अप्रकाश्यमिदं तन्त्रं रहस्यं परदुर्लभम् ।
(शिवस्य पुरुषाख्यस्य दर्शनं श्रुणु षण्मुख)
शिवज्ञानं महासेन संक्षेपाद्वक्ष्यतेऽधुना ॥ १० ॥

प्रथमं तत्त्वभेदं तु द्वितीयं वर्णभेदकम् ।
तृतीयं चक्रभेदं तु चतुर्थं वर्गभेदकम् ॥ ११ ॥

पञ्चमं मन्त्रभेदं तु षष्ठं प्रणवमुच्यते ।
सप्तमं ब्रह्मभेदं स्यादङ्गभेदमथाष्टकम् ॥ १२ ॥

नवमं मन्त्रजातं तु दशमं कीलमुच्यते ।
एतानि दशभेदानि कीर्तितानि क्रमेण तु ॥ १३ ॥

एतेषामेव पूर्वं तु तत्त्वभेदं वदाम्यहम् ।
तत्त्वं तु त्रिविधं ज्ञेयं तस्य भेदं श्रुणुष्व हि ॥ १४ ॥

शिवः सदाशिवश्चैव महेशश्च त्रिधा स्मृतः ।
शिवतत्त्वं महासेन निष्कळं त्विति कीर्तितम् ॥ १५ ॥

सकळं निष्कळं चैव सादाख्यमिति चोच्यते ।
महेशं सकळं विद्यात् त्रिविधास्ते भवन्ति वै ॥ १६ ॥

शिवमेकं विजानीयात्सादाख्यं पंचधा भवेत् ।
महेशं तु महासेन पंचविंशतिभेदकम् ॥ १७ ॥

एतेषां तत्त्वसंयुक्तमेकत्रिंशदिति स्मृतम् ।
शिवस्य लक्षणं वक्ष्ये समासाच्छृणु षण्मुख ॥ १८ ॥

शिवं परात्परं सूक्ष्मं नित्यं सर्वगमव्ययम् ।
अनिंदितमनौपम्यमप्रमेयमनामयम् ॥ १९ ॥

शुद्धत्वाच्छिवमुद्दिष्टं परादूर्ध्वं परात्परम् ।
व्योमातीततनुं सूक्ष्मं नित्यं कारणकारणम् ॥ २० ॥

व्याप्त्या सर्वगतं प्रोक्तमक्षीणादव्ययं भवेत् ।
अमलोऽनिंदितं ज्ञेयमसादृश्यादनौपमं ॥ २१ ॥

प्रमाणव्यतिरिक्तत्वादप्रमेयमिति स्मृतं ।
निर्गुणत्वाद्विशेषेण अनामयमिति स्मृतम् । ॥ २२ ॥

इत्येतैर्लक्षणैर्युक्तं शिवरूपमिहोच्यते ।
सृष्ट्यर्थं सर्वतत्त्वानां लोकस्योत्पत्तिकारणम् ॥ २३ ॥

* योगिनामुपकाराय स्वेच्छया चिन्तितः शिवः ।
तच्छिवे तु पराशक्तिस्सहस्रांशेन जायते ॥ २४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

तच्छक्तेस्तु सहस्रांशादादिशक्तिसमुद्भवः ।
आदिशक्तिसहस्रांशादिच्छाशक्तिसमुद्भवः ॥ २५ ॥

इच्छाशक्तिसहस्रांशात् ज्ञानशक्तिसमुद्भवः ।
ज्ञानशक्तिसहस्रांशात् क्रियाशक्तिसमुद्भवः ॥ २६ ॥

एता वै शक्तयः पंच निष्कळाश्चेति कीर्तिताः ।
शिवसृष्टिरियं प्रोक्ता शक्तीनां सृष्टिरुच्यते ॥ २७ ॥

योगिनां च यतीनां च ज्ञानिनां मन्त्रिणां तथा ।
ध्यानपूजानिमित्ताय सकळं निष्कळं भवेत् ॥ २८ ॥

तद्रूपं हि समासेन सादाख्यमिति कीर्तितम् ।
सादाख्यं पंचधा प्रोक्तं तेषां लक्षणमुच्यते ॥ २९ ॥

पंचशक्त्यादिशक्तेश्च सादाख्यस्य समुद्भवः ।
प्रथमं शिवसादाख्यममूर्तं तु द्वितीयकम् ॥ ३० ॥

तृतीयं मूर्तसादाख्यं चतुर्थं कर्तृनामकम् ।
पंचमं कर्मसादाख्यमुक्तं सादाख्यपंचकम् ॥ ३१ ॥

सदाशिवस्तथेशश्च ब्रह्मा वै चेश्वरः स्मृतः ।
ईशानश्चेति पंचैते तत्त्वभेदाः प्रकीर्तिताः ॥ ३२ ॥

एतेषु पंचतत्त्वेषु विशेषमधुनोच्यते ।
मूर्तं ब्रह्मेति विज्ञेयममूर्तं चेश ईरितः ॥ ३३ ॥

मूर्तं ब्रह्मेति विज्ञेयं कर्तृ चैवेश्वरः स्मृतः
कर्मेशानमिति प्रोक्तमित्येवं द्विविधं स्मृतम् ॥ ३४ ॥

परात्परतरं चैव सूक्ष्मतस्सूक्ष्ममेव च ।
स्थूलसूक्ष्मक्रमेणैव शिवादि परिलक्ष्यते ॥ ३५ ॥

तदेतत्त्रिविधं स्थूलं सूक्ष्मतरत्वं ततः परम् ।
अस्मदाद्यमनिर्दिश्यं स्थूलसूक्ष्मं च योगिनः ॥ ३६ ॥

ततः परं तु यन्नित्यं ज्ञानमानन्दमव्ययम् ।
तन्निष्ठैस्तत्परैर्भक्त्या दृश्यं तद्रूपमास्तिकैः ॥ ३७ ॥

एतेषु पंचतत्त्वेषु विशेषमधुनोच्यते ।
तत्त्वमूर्तिप्रभावश्च त्रिविधो विद्यते क्रमात् ॥ ३८ ॥

शिवश्च तत्त्वमित्युक्तं मूर्तिश्चैव महेश्वरः ।
तयोर्योगेन यद्रूपं तद्रूपं भावसंज्ञकम् ॥ ३९ ॥

भावं सादाख्यमित्युक्तमित्येवं परिकल्पितम् ।
सन्ततं शिवभावत्वात्सादाख्यमिति कीर्तितम् ॥ ४० ॥

निष्कळं तत्त्वमित्युक्तं सकळं मूर्तिरीरिता ।
सकळं निष्कळं चैव प्रभावमिति कीर्तितम् ॥ ४१ ॥

देही निष्कळमित्युक्तं देहं सकलमीरितम् ।
देही देहस्य सम्बन्धमेवं रूपमिति स्मृतम् ॥ ४२ ॥

सर्वेषां ध्यानपूजार्थं सकळं निष्कळं भवेत् ।
एवं ज्ञात्वा विशेषेण सर्वकर्म समाचरेत् ॥ ४३ ॥

पंच सादाख्यतत्वानामुद्भवं हि पृथक्पृथक् ।
तेषां रूपं च वर्णं च समासाच्छृणु षण्मुख ॥ ४४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

शांत्यतीता पराशक्तिस्तस्याः पर्यायवाचकाः।
पराशक्तेर्दशांशेन शिवसादाख्यसम्भवः ॥ ४५ ॥

पराशक्त्युद्भवत्वाच्च शुद्धत्वाच्छिवमीरितम्।
तद्रूपं सूक्ष्मरूपेण ज्योतीरूपमिति स्मृतम् ॥ ४६ ॥

विद्युद्रूपमिवाकाशे प्रत्यक्षं सर्वतोमुखम्।
शिवतत्त्वमिति प्रोक्तं तत्वानामखिलालयम् ॥ ४७ ॥

शिवसादाख्यमित्युक्तममूर्तं तु ततः श्रुणु।
शांतिरेवाऽऽदिशक्तिश्च तस्याः पर्यायवाचकाः ॥ ४८ ॥

आदिशक्तिदशांशेन ह्यमूर्तस्य समुद्भवः।
आदिशक्तिरमूर्तत्वादमूर्तं चेति कीर्तितम् ॥ ४९ ॥

अमूर्तत्वात्कलाहीनं तद्रूपं लिङ्गवद्भवेत्।
सूर्यकोटिप्रतीकाशं ज्योतिस्तम्भाकृतिस्थितम् ॥ ५० ॥

तस्याभ्यन्तर्गता मूर्तिरमूर्तादिरिहोच्यते।
एतद्वै दिव्यलिंगं तु मूलस्तम्भमिहोच्यते ॥ ५१ ॥

लिङ्गात्सर्वं समुत्पन्नं लयं तस्मिन्प्रकीर्तितम्।
सृष्टिसंहारमेवोक्तं लिङ्गनाम्ना त्विहोच्यते ॥ ५२ ॥

अमूर्तमेवमाख्यातं समूर्तं तु ततः श्रुणु।
इच्छाशक्तिश्च विद्या च तस्याः पर्यायवाचकाः ॥ ५३ ॥

तच्छक्तेस्तु दशांशेन ज्योतीरूपमिहोच्यते।
इच्छाशक्तेर्गुणत्वाच्च तस्मान्मूर्तिरुदाहृता ॥ ५४ ॥

मूर्तत्वाच्च कलायुक्तं रूपं चेति प्रकीर्तितम्।
ज्वालाग्निसदृशप्रख्यं दिव्यलिंगाकृतिर्भवेत् ॥ ५५ ॥

तस्योर्ध्वांशैकभागे तु चैकवक्त्रसमन्वितम्।
त्रिनेत्रं चारुवदनं सर्वाऽवयवसंयुतम् ॥ ५६ ॥

कृष्णापरशुहस्तं च वराऽभयचतुर्भुजम्।
एवं लक्षणसंयुक्तं लिंगमूर्तमुदाहृतम् ॥ ५७ ॥

एकमेकासनोपेतं दिव्यलिंगाकृतिर्भवेत्।
मूर्तिसादाख्यमित्युक्तं कर्तृसादाख्यमुच्यते ॥ ५८ ॥

ज्ञानं चैव प्रतिष्ठा च तस्याः पर्यायवाचकाः।
ज्ञानशक्तिदशांशेन कर्तृसादाख्यसंभवः ॥ ५९ ॥

ज्ञानकर्तृस्वभावत्वात् कर्तृनामेति कीर्तितम्।
ज्ञानं हि शुद्धरूपत्वात् स्फाटिकाभासमुच्यते ॥ ६० ॥

दिव्यलिंगं महादीर्घं महास्थूलतयान्वितम्।
तस्य मध्यस्थिता मूर्तिरीश्वरस्सर्वकारणम् ॥ ६१ ॥

चतुर्मूर्धं चतुर्वक्त्रं नेत्रद्वादशसंयुतम्।
चतुरास्यं चतुर्वर्णं वसुश्रोत्रसमन्वितम् ॥ ६२ ॥

अष्टहस्तं द्विपादं च सर्वलक्षणसंयुतम्।
शूलं परशुखड्गं च अभयं दक्षिणे करे ॥ ६३ ॥

पाशं नागं च घंटां च वरदं वामहस्तके।
सर्वाऽवयवसंयुक्तं सर्वाभरणभूषितम् ॥ ६४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

एवं तमीश्वरं विद्यात् कर्तृसादाख्यलिंगकम् ।
कर्तृसादाख्यमित्युक्तं कर्मसादाख्यमुच्यते ॥ ६५ ॥

निवृत्तिः स्यात्क्रियाशक्तिस्तस्याः पर्यायवाचकाः ।
क्रियाशक्तिदशांशेन कर्मसादाख्यसंभवः ॥ ६६ ॥

क्रिया कर्मेति विज्ञेया तस्मात्कर्मेति नामतः ।
लिंगपीठप्रकारेण कर्मसादाख्यलक्षणम् ॥ ६७ ॥

नादं लिंगमिति ज्ञेयं बिंदुपीठमुदाहृतम् ।
नादबिंदुयुतं रूपं लिंगाकारमिति स्मृतम् ॥ ६८ ॥

चत्वारि कर्तृरूपाणि केवलं नादमीरितम् ।
लिंगं शिवमिति ज्ञेयं पीठं शक्तिरुदाहृता ॥ ६९ ॥

योनिलिंगप्रकारेण जगत्सृष्ट्यर्थकारणम् ।
तथा संयोगभावेन कर्मरूपमुदाहृतम् ॥ ७० ॥

बिंदुमध्यगतो नादः नादमध्येतु मूर्तयः ।
मूर्तिमध्यगतं तत्त्वं तत्त्वमध्यगतश्शिवः ॥ ७१ ॥

एतच्छिवमयं लिंगं सर्वतत्त्वालयं विदुः ।
लिंगे तु जायते सर्वं जगत्स्थावरजंगमम् ॥ ७२ ॥

तस्माल्लिंगं विशेषेण कर्मरूपमुदाहृतम् ।
कर्मोदये च सृष्टिः स्यात् कर्मांते संहृतिर्भवेत् ॥ ७३ ॥

एतत्कर्मस्वरूपं तु सृष्टिस्थितिलयावहम् ।
पंचसादाख्ययोगेन कर्मसादाख्यमुच्यते ॥ ७४ ॥

शिवसादं विशेषेण शिवरूपसमाश्रितम् ।
अमूर्तं तु महासेन शिवसादाख्यमाश्रितम् ॥ ७५ ॥

मूर्तरूपं विशेषेण अमूर्तादिसमाश्रितम् ।
कर्तृसादाख्यमेवं हि समूर्तादिसमाश्रितम् ॥ ७६ ॥

कर्मरूपं क्रमेणैव कर्तृरूपं समाश्रितम् ।
अनेनैव प्रकारेण चैकैकं तु समाश्रितम् ॥ ७७ ॥

तस्मात्कर्मस्वरूपं तु पंचतत्त्वाश्रितं विदुः ।
पंचतत्त्वात्मकं ज्ञेयं सर्वाधारं समाश्रितम् ॥ ७८ ॥

एतद्धि मूर्तिपिंडत्वात् पिंडकायमिति स्मृतम् ।
पिंडस्थं पिंडमध्यस्थं पिंडेन तु पुटीकृतम् ॥ ७९ ॥

पिंडेन पिंडितं पिंडं पिंडरूपमुदाहृतम् ।
पंचात्मकमभूतपिंडं धातुबंधगुणात्मकम् ॥ ८० ॥

तस्माद्धि कर्मसादाख्यं पिंडरूपमुदाहृतम् ।
एतच्छिवमयं पिंडं सर्वतत्त्वालयं विदुः ॥ ८१ ॥

पंचमूर्तिमयं देवं पंचतत्त्वात्मकं भवेत् ।
मूर्तीनां देहभेदैस्तु गुणैः पंचाननं विदुः ॥ ८२ ॥

तद्देहं तु महेशादि सर्वतत्त्वादिसम्भवः ।
तस्य वक्त्रेषु सम्भूतास्सिद्धान्ताः शैवतांत्रिकाः ॥ ८३ ॥

तत्त्वार्थं तु महेशादि सर्वतत्त्वसमुद्भवः ।
सर्वज्ञानमयं देवं सर्वकारणकारणम् ॥ ८४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

एवं लिंगं तु कर्मेशं ध्यायेत्सकळनिष्कळम् ।
देहस्थं सकळं ज्ञेयं निष्कळं देहवर्जितम् ॥ ८५ ॥

देहस्त्वेतत्कळोपेतं धातुपिंडमिति स्मृतम् ।
षट्कळाश्चैव धात्रीश्च (शास्त्रज्ञः) षडंगैस्तु प्रकल्पयेत् ८६

सर्वांगैरपि सम्पूर्णं सर्वाऽवयवसुन्दरम् ।
एवं तत्स्मृतिमात्रेण मूर्तिः सकलरूपधृक् ॥ ८७ ॥

निष्कळं तदभावेतु तत् स्यात्सकळनिष्कळम् ।
सवीर्यं चैव निर्देहं मांसास्थिरुधिराणि च ॥ ८८ ॥

इन्द्रचापमिवाकाशे दर्पणे प्रतिबिंबवत् ।
इत्येतन्मनसाकल्प्य सकळं निष्कळं भवेत् ॥ ८९ ॥

ध्यानलक्षणमित्युक्तमङ्गभावमथोच्यते ।
अङ्गभेदो महासेन चतुर्भिर्भेद उच्यते ॥ ९० ॥

अंगं प्रत्यंगसांगं चोपांगं चत्वारि च क्रमात् ।
शिरोवक्त्रंच हृदयमंगं चेति प्रकीर्तितम् ॥ ९१ ॥

शिवमध्यगतं नृत्तं नृत्तमध्ये तु शांतकम् ।
अतीतं शांतमध्ये तु शांत्यतीतं परात्परम् ॥ ९२ ॥

वक्षं कण्ठः स्तनौ बाहुनाभिगुह्योदराणिच ।
नेत्रे नासास्यकर्णाश्च पाणिपादौ तथांगुळिः ॥ ९३ ॥

ऊरू च जानुजंघे च प्रत्यंगं चेति कीर्तितम् ।
मूर्तीनां गुणरूपं च सांगं चेति प्रकीर्तितम् ॥ ९४ ॥

गुणचिह्नमिति ज्ञेयं तद्गुणं दशधा भवेत् ।
त्रिगुणं शक्तिखंडं च दुर्भेद्योऽनुग्रहस्तथा ॥ ९५ ॥

विधिर्मायाविवर्णं च वर्णास्संहार एव च ।
एते दशगुणाः प्रोक्तास्तेषां लक्षणमुच्यते ॥ ९६ ॥

त्रिगुणं शूलमित्युक्तं शक्तिः परशुरीरितः ।
खड्गमीशप्रतापः स्यात् दुर्भेद्यं वज्रमिष्यते ॥ ९७ ॥

ईशस्यानुग्रहश्चैव अभयं तु प्रशस्यते ।
विधिः स्यान्नागरूपं तु पाशं मायास्वरूपकम् ॥ ९८ ॥

विवर्णमंकुशंचैव वर्णं सादात्मकं विदुः ।
संहारस्त्वग्निरूपं स्यात्तेषामाख्याः प्रकीर्तिताः ॥ ९९ ॥

एतानि गुणरूपाणि सांगानि च यथाक्रमम् ।
वस्त्रोपवीतमाल्यानि गन्धाश्चाभरणं यथा ॥ १०० ॥

तथैवावरणं चैव उपांगं प्रोच्यतेऽपि च ।
अंगभेदमितिप्रोक्तं तस्य रूपमिहोच्यते ॥ १०१ ॥

कुन्देन्दुस्फाटिकाभासं जटामकुटमण्डितम् ।
पंचमूर्धसमायुक्तं पंचवक्त्रसमायुतम् ॥ १०२ ॥

प्रतिवक्त्रं विशेषेण त्रिलोचनसमायुतम् ।
दिग्भुजं तु महासेन द्विपादं पद्मसंस्थितम् ॥ १०३ ॥

शूलं परशुखड्गौ चाऽभयवज्रे च दक्षिणे ।
नागं पाशांकुशं चैव घंटां वह्निं च वामके ॥ १०४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ।
दिव्यांबरधरं देवं दिव्यरूपमुदाहृतम् ॥ १०५ ॥

दिव्यगंधानुलिप्तांगं दिव्यमालाविभूषितम् ।
शांतरूपमिदं वत्स किंचित्प्रहसिताननम् ॥ १०६ ॥

एतद्रूपं स्मरेन्नित्यं धर्मकामार्थमोक्षदम् ।
ध्यानरूपमिदं प्रोक्तं विशेषमधुनोच्यते ॥ १०७ ॥

कर्मेशं पूर्वरूपं तु कर्तृसव्यानन्नं भवेत् ।
अपरं मूर्तिवक्त्रं स्यादमूर्तं चोत्तराननम् ॥ १०८ ॥

ऊर्ध्वं तु शिवसादाख्यमेवं पंचाननं विदुः ।
ईशानादीनि मूर्धादि तथा कर्मांतवद्भवेत् ॥ १०९ ॥

प्रागवक्त्रं पूर्वमुद्दिष्टं पश्चिमं पश्चिमाननम्
दक्षिणाभिमुखं याम्यमुत्तरं चोत्तराननम् ॥ ११० ॥

ऊर्ध्वेतु दक्षिणं सव्यमितरं पश्चिमोत्तरम् ।
किंचिदस्मिन्विशेषोऽस्ति चोर्ध्ववक्त्रस्य षण्मुख ॥ १११ ॥

मूलं संचिंत्य तद्वक्त्रं परं मुखमिति स्मृतम् ।
पूजाकाले तु तद्ध्यात्वा अर्चयेत्कर्मवक्त्रवत् ॥ ११२ ॥

एवं संकल्प्य विधिवत्पूजांते पूर्ववद्भवेत् ।
एतत्पंचात्मकत्वात्तु सर्वकारणकारणम् ॥ ११३ ॥

सदाशिवमिति प्रोक्तमिति शास्त्रेषु निश्चितम् ।
एतद्वै कर्मरूपत्वात् कर्मकर्मणि कारयेत् ॥ ११४ ॥

कर्षणादि क्रियादीनि कर्म चेति निगद्यते ।
तस्माद्वै स्थापनादीनि कर्ममूर्तौ तु कारयेत् ॥ ११५ ॥

लिंगे वा स्थंडिले वह्नौ कुम्भे वा हृदयेपि वा ।
ध्यात्वा सदाशिवं पूज्य विधिवत् स्थापयेत्ततः ॥ ११६ ॥

तस्माद्वै स्थापनादीनि कर्ममूर्तौ तु कारयेत् ।

आवाहनं स्वात्मनि चित्प्रकाशं
तत्र स्थितिस्थापनमीश्वरस्य
सान्निध्यमात्रेश्वरसन्निधानं
संरोधनं स्वस्य शिवे निरोधः ॥ ११७ ॥

कर्त्रादिकं चतुर्णांतु स्थापनं च न कारयेत् ॥ ११८ ॥

योगिनां मंत्रिणां चैव स्तुतिमात्रं भवेदिह ।
इत्येतैर्लक्षणैर्युक्तं कर्मसादाख्यलिंगकम् ॥ ११९ ॥

शिवादिकर्मपर्यंतं क्रमेणैव प्रकीर्तितम् ।
सादाख्यलक्षणं प्रोक्तं महेशं शृणु षण्मुख ॥ १२० ॥

कर्मेशस्य सहस्रांशान्महेशस्य समुद्भवः ।
महेशं सकळं विद्यात् सृष्टिस्थितिलयात्मकम् ॥ १२१ ॥

पंचविंशतिभेदैस्तु तन्मूर्तिर्विविधा भवेत् ।
नानारूपधरं देवं नानारूपसमन्वितम् ॥ १२२ ॥

नानाचिह्नसमोपेतं नानालीलाधरं हरम् ।
स्थानयानं समासीनं नृत्तं कोपं च सास्यकम् ॥ १२३ ॥

In Public domain. Digitization Muthulakshmi Research Academy

अनेकाकारसंयुक्तं देवदेवं महेश्वरम् ।
जटामकुटसंयुक्तमेकवक्त्रं त्रिनेत्रकम् ॥ १२४ ॥

चतुर्भुजसमायुक्तमेकपद्मासनस्थितम् ।
वरदाभयहस्तं च मृगीपरशुधारकम् ॥ १२५ ॥

महेशरूपमेवोक्तं रूपभेदमथोच्यते ।
प्रथमं सोमधारी स्यात् द्वितीयमुमया सह ॥ १२६ ॥

तृतीयं तु वृषारूढश्चतुर्थं नृत्तरूपकम् ।
वैवाह्यं पंचमं विद्यात् षष्ठं भिक्षाटनं भवेत् ॥ १२७ ॥

कामारिं सप्तमं विद्यात् कालारिश्चाष्टमोभवेत् ।
नवमं त्रिपुरारिः स्याज्जलंधरवधो दश ॥ १२८ ॥

एकादशं गजारिः स्याद्द्वादशो वीरभद्रकः ।
त्रयोदशो हरेरर्धमर्धनारिश्चतुर्दश ॥ १२९ ॥

किरातः स्यात्पंचदश कंकाळः षोडशो भवेत् ।
चण्डेशानुग्रहस्सप्तदशेति परिकीर्तितः ॥ १३० ॥

विषापहरणश्चाष्टादशेति समुदाहृतः ।
चक्रदानस्वरूपं च एकोनविंशति स्मृतम् ॥ १३१ ॥

विंशतिर्विघ्नप्रसादः सोमास्कन्दस्ततः परम् ।
उमास्कन्दश्चैकविंशः द्वाविंशश्चैकपादकः ॥ १३२ ॥

सुखावहस्त्रयोविंशः भवेच्च तदनन्तरम् ।
दक्षिणामूर्तिरूपन्तु चतुर्विंशतिरीरितम् ॥ १३३ ॥

लिंगोद्भवस्वरूपं तु पञ्चविंशतिरीरितम् ।
एते महेशरूपाश्च मूर्तिभेदाः प्रकीर्तिताः ॥ १३४ ॥

सोमधारादि लिङ्गान्तं कर्मणा च समुद्भवः ।
एते महेशरूपाश्च कर्माख्यादि समुद्भवाः ॥ १३५ ॥

पंचविंशत्प्रकारेण रूपं प्रति पृथक् पृथक् ।
महेशस्य सहस्रांशाद्रुद्रदेवसमुद्भवः ॥ १३६ ॥

तन्महेश्वरकोटयंशाद्विष्णुदेव समुद्भवः ।
विष्णुदेवस्य कोटयंशात् ब्रह्मदेवसमुद्भवः ॥ १३७ ॥

नेत्रेषु सव्यवामोर्ध्वे सूर्यसोमाग्निसम्भवाः ।
घ्राणे वायुस्समुत्पन्नः श्रोत्रे कीलादिचोद्भवः ॥ १३८ ॥

आस्ये ज्ञानं समुत्पन्नं गणेशस्तु गळोद्भवः ।
षण्मुखो हृदये जातो नाभौ देवाश्च सम्भवाः ॥ १३९ ॥

पंचाशत्कोटिदेवाश्च महेशांशसमुद्भवाः ।
ऋषयश्च तथा कोट्यो रोम्णि चैव समुद्भवाः ॥ १४० ॥

तत्वानामुद्भवः प्रोक्तः शक्तीनामुद्भवं शृणु ।
बिन्दुरूपदशांशेन चोमाशक्तिः समुद्भवाः ॥ १४१ ॥

उमांबिका गणेशी च ईश्वरी च मनोन्मनी ।
एकैकेन दशांशेन जायते क्रमशस्तथा ॥ १४२ ॥

एता वै शक्तयः पंच शिवादीनां च शक्तयः ।
मनोन्मनी सहस्रांशाद्गौरी जातेति कीर्तिता ॥ १४३ ॥

In Public domain. Digitization Muthulakshmi Research Academy

लक्ष्मीस्सरस्वती दुर्गा उमायाश्च प्रभावतः ।
शची ज्येष्ठा तथा शांता तथा चान्याश्च शक्तयः ॥ १४४ ॥

कोटिशक्तय एता वै गौरीदेहसमुद्भवाः ।
शक्तिभेदो विशेषेण समासात्परिकीर्तितः ॥ १४५ ॥

शिवादयो महेशांताः एकत्रिंशत्प्रकीर्तिताः ।
यो वेत्ति तत्त्वभेदं हि सपूजास्थापनार्हकः ॥ १४६ ॥

एवं त्रिमूर्तिभेदस्तु समासात्परिकीर्तितः ।
तत्त्वभेदमिदं प्रोक्तं वर्णभेदमथ श्रुणु ॥ १४७ ॥*

इति श्रीवातुलोत्तरतंत्रे शुद्धाख्ये सहस्रग्रंथसंहितायां
तत्त्वभेदं नाम
॥ प्रथमः पटलः ॥

॥ अथ वर्णभेदपटलः ॥

समस्तबीजं प्रभवस्य कारणं
नमामि देवं प्रणवान्तरस्थितम् ।
त्रिवर्णसंभूतविवर्णवर्णगं
स्वशक्तिसंक्षोभकरं परं हरम् ॥

अथातस्संप्रवक्ष्यामि वर्णभेदविधिं परम् ।
मन्त्राणामुद्भवत्वं च वर्णानां च समुद्भवम् ॥ १ ॥

अकारादिक्षकारान्तमेकपञ्चाशदक्षराः ।
एते वर्णाः प्रशस्यन्ते कामितार्थप्रदायकाः ॥ २ ॥

स्त्रीरूपा इव पुंरूपाः तथा चोभयरूपकाः ।
सर्वे वै (च) देवतारूपाः प्रत्येकं वर्णरूपधृक् ॥ ३ ॥

वर्णं बीजं तथार्णं च लिङ्गमक्षरमातृकम् ।
एते वै षट् च नामानि वर्णपर्यायवाचकाः ॥ ४ ॥

तेभ्यः समुद्भवं नाम रूपभेदं तथांशकम् ।
तत्त्वमन्त्रादिभेदं च अधिदैवफलं तथा ॥ ५ ॥

स्थूलसूक्ष्माकृतिं चैव जीवोपाधिविभेदकम् ।
एतद्भेदं महासेन संक्षेपाच्छृणु षण्मुख ॥ ६ ॥

शिवतत्त्वे परे सूक्ष्मे बिन्दुरूपं तु जायते ।
बिन्दोर्नादस्समुत्पन्नो नादान्ते शक्ति जायते ॥ ७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

शक्तेस्तु जायते शब्दश्शब्दाज्जायेत वाग्भवम् ।
वाग्भवाच्च कला जाताः कलाभ्यो विकलास्तथा ॥ ८ ॥

तस्माद्वै वाचको मन्त्रः मन्त्रस्तैरेव भिद्यते ।
एतत्सृष्टिक्रमं प्रोक्तं तेषां लक्षणमुच्यते ॥ ९ ॥

बिन्दुरूपा पराशक्तिः नादश्चैवादिरुच्यते ।
शक्तिरिच्छेति विज्ञेया शब्दो ज्ञानमिहोच्यते ॥ १० ॥

वाग्भवं स्यात्क्रियाशक्तिः कळा वै षोडश स्वराः ।
तेषां रूपं यथा प्रोक्तं प्रकृतिर्विकृतिस्तथा ॥ ११ ॥

प्रकृतिस्सप्तवर्णानि विकृतिस्तु नवार्णकम् ।
अकारश्च इकारश्च उकारश्च ऋकारकम् ॥ १२ ॥

लृकारं चैव एकारं तथैवोकारमेव च ।
एते सप्तस्वराः प्रोक्ताः प्रकृतिस्तु समीरिता ॥ १३ ॥

शेषास्तु विकृतिः प्रोक्ताः तेषामुद्भवमुच्यते ।
अकारे चोद्भवाकारं इकारे ई समुद्भवः ॥ १४ ॥

उकारे चैव ऊकारः ऋकारे ॠसमुद्भवः ।
लृकारे चैव ॡकारः एकारे त्वैसमुद्भवः ॥ १५ ॥

ओकारे चौ तथा ज्ञेयः क्रमेणैव समुद्भवः ।
एते वै विकृतिः प्रोक्ताः आकारादि नवार्णकाः ॥ १६ ॥

अकारादि विसर्गान्ताः एते वै षोडश स्वराः ।
कलामात्रा स्वरा जीवाः प्रकृतिर्विकृतिस्तथा ॥ १७ ॥

प्राणा आत्मा च देही च कलाः पर्यायवाचकाः ।
एतानि दश नामानि कलानामेव युज्यते ॥ १८ ॥

कलाभेदमिदं प्रोक्तं विकलाभेदकं शृणु ।
ककारादि क्षकारान्ताः वर्णाश्च विकला स्मृताः ॥ १९ ॥

काकारादीनि वर्णानि इ (अ) कारेतु समुद्भवाः ।
ओकारे तु समुद्भूताः यकारादि दश स्मृताः ॥ २० ॥

*चकारादीनि पंचार्णा उकारे तु समुद्भवाः ।
पकारादीनि पंचार्णा एकारे तु समुद्भवाः ॥ २१ ॥

ककारे च समुद्भूता यकारादि दशाक्षराः ।
एते वै विकलाः प्रोक्ताः पञ्चत्रिंशाक्षराः स्मृताः* ॥ २२ ॥

देहोपाधिशरीरं च क्षेत्राधारस्तनुस्तथा ।
व्यञ्जनं विकलाशक्तिः बिन्दुपर्यायवाचकाः ॥ २३ ॥

कलानां विकलानां तु त्रीणि रूपाणि वक्ष्यते ।
शिवाग्निभूतरुद्राश्च त्रयोदश तिथिस्तथा ॥ २४ ॥

एते वै स्वरवर्णानि पुल्लिङ्गाश्चेति कीर्तिताः ।
पक्षवेदरसोभानुमनुशैवाधिकारकम् ॥ २५ ॥

एते वै षट् च नामानि स्त्रीलिङ्गाश्चेति कीर्तिताः ।
ऋ ॠ ऌ ॡ च चत्वारो नपुंसक इति स्मृताः ॥ २६ ॥

ककारं च गकारं च चकारं च जकारकम् ।
टकारं च डकारं च तकारं च दकारकम् ॥ २७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

पकारं च बकारं च षकारं च क्षकारकम् ।
एते द्वादश वर्णाश्च पुंल्लिङ्गाश्चेति कीर्तिताः ॥ २८ ॥

खकारं च घकारं च छकारं च झकारकम् ।
ठकारं च ढकारं च थकारं च धकारकम् ॥ २९ ॥

फकारं च भकारं च शकारं च सकारकम् ।
एतानि भानुबीजानि स्त्रीलिङ्गाश्चेति कीर्तिताः ॥ ३० ॥

शेषं नपुंसकं विद्यात् त्रयो भेदा इति स्मृताः ।
अकारादि त्रयो व्योम ईकारादि त्रयोऽनिलः ॥ ३१ ॥

ऋकारादीनि वर्णानि तेषामग्निरिति स्मृतः ।
एकारादि त्रयो ह्यापः औकारादि त्रयो मही ॥ ३२ ॥

प्रकृतिस्तत्त्वबीजं स्यात् विकृतिर्मूर्तिरुच्यते ।
प्रभावं विकलाः प्रोक्ताः इत्येवं त्रिविधा भवेत् ॥ ३३ ॥

प्रकृतिर्ह्रस्वमित्युक्तं विकृतिर्दीर्घमुच्यते ।
एकमात्रो भवेद्ध्रस्वः द्विमात्रो दीर्घ उच्यते ॥ ३४ ॥

व्यञ्जनं त्वर्धमात्रं स्यात् इत्येतल्लक्षणं भवेत् ।
*त्रिमात्रस्तु प्लुतो ज्ञेयः व्यञ्जनं त्वर्धमात्रकम् ॥ ३५ ॥

विकलात्वर्धमात्रं स्यादित्येतल्लक्षणं भवेत् ।
मात्रासंख्या इति प्रोक्ता तासां लक्षणमुच्यते* ॥ ३६ ॥

अकारस्सर्वदैवत्यं रक्तं सर्वशरीरकम् । (वशीकरम् ।)
आकारं स्यात् पराशक्तिः श्वेतमाकर्षणं भवेत् ॥ ३७ ॥

इकारं विष्णुदैवत्यं श्यामं रक्षाकरं भवेत् ।
मायाशक्तिस्तु ईकारं पीतं स्त्रीणां वशीकरम् ॥ ३८ ॥

उकारः वास्तुदैवत्यं कृष्णं राजवशीकरम् ।
ऊकारं भूमिदेवी च श्यामं लोकवशीकरम् ॥ ३९ ॥

ऋकारं ब्रह्मणो ज्ञेयं पीतं ग्रहविनाशकम् ।
शिखण्डीरूपं ॠकारं ह्यञ्जनं ज्वरनाशनम् ॥ ४० ॥

अश्विनीभ्यां ऌ ॡकारं श्वेतरक्तं ज्वरापहम् ।
एकारं वीरभद्रं स्यात् पीतं सर्वार्थसिद्धिदम् ॥ ४१ ॥

ऐकारं वाग्भवं विद्यात् स्फाटिकं ज्ञानसिद्धिदम् ।
ओकारमीश्वरं विद्यात् ज्योतिस्सर्वफलप्रदम् ॥ ४२ ॥

औकारमादिशक्तिस्स्याच्छुक्लं सर्वत्रसिद्धिदम् ।
अंकारस्तु महेशस्स्याद्रक्तवर्णं सुखप्रदम् ॥ ४३ ॥

अःकारं कालरुद्रं च रक्तं पाशनिकृन्तनम् ।
प्राजापत्यं ककारं स्यात् पीतं सृ(वृ)ष्टिकरं भवेत् ॥ ४४ ॥

खकारं जाह्नवीबीजं क्षीराभं पापनाशनम् ।
गकारं गणबीजं स्यात् रक्ताभं विघ्ननाशनम् ॥ ४५ ॥

घकारं भैरवं ज्ञेयं मुक्ताभं शत्रुनाशनम् ।
ङकारं कालबीजं स्यात् कालं सर्व(र्प)जयं भवेत् ॥ ४६ ॥

चकारं चण्डरुद्रं स्यात् अञ्जनं त्रिपुरापहम् ।
छकारं भद्रकाळी स्यात् राजावर्तं जयप्रदम् ॥ ४७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

जकारं जम्भहा ज्ञेयं रक्ताभं च जयावहम् ।
झंकारमर्धनारी स्यात् श्यामं रक्तं जयावहम् ॥ ४८ ॥

ञकारं कोटिविज्ञेयं पीतं रोगविनाशनम् ।
भृङ्गीशस्स्यात् टकारं तु रक्तं सर्वसुखावहम् ॥ ४९ ॥

ठकारं चन्द्रबीजं स्यात् सितं मृत्युविनाशनम् ।
डकारं चैकनेत्रं स्यात् पीतं कालजयं भवेत् ॥ ५० ॥

ढकारं यमबीजं स्यात् नीलं मृत्युविनाशनम् ।
णकारं नन्दिबीजं स्यात् रक्ताभं चार्थसिद्धिदम् ॥ ५१ ॥

तकारं वास्तुदैवत्यं श्वेतं सर्वजयं भवेत् ।
थकारं धर्मणो ज्ञेयं कुन्दाभं स्याज्जयप्रदम् ॥ ५२ ॥

दुर्गाबीजं दकारं स्यात् श्यामं सर्वार्थसिद्धिदम् ।
धकारं धनदं प्रोक्तं पीताभं चार्थसिद्धिदम् ॥ ५३ ॥

नकारं चैव सावित्री स्फाटिकं पापनाशनम् ।
पकारं पर्जबीजं स्यात् शुक्लाभं वृष्टिसिद्धिदम् ॥ ५४ ॥

फकारं पाशुपत्यं स्यात् ज्ञानं पापनिकृन्तनम् ।
बकारं तु त्रिमूर्तिस्स्यात् पीतं सर्वार्थसिद्धिदम् ॥ ५५ ॥

भकारं भार्गवं विद्यात् रक्तं सर्वार्थसिद्धिदम् ।
मकारं मदनं विद्यात् श्यामं सर्वजयप्रदम् ॥ ५६ ॥

यकारं वायुदैवत्यं कृष्णमुच्चाटनं भवेत् ।
रकारं वह्निदैवत्यं रक्ताभं संहृतिर्भवेत् ॥ ५७ ॥

लकारं पृथ्वितत्वं स्यात् पीतं स्यात् स्तम्भनं भवेत् ।
वारुणं स्याद्वकारं तु शुक्लाभं रोगनाशनम् ॥ ५८ ॥

लक्ष्मीरूपं शकारं स्यात् हेमाभं श्रीकरं भवेत् ।
षकारं द्वादशादित्यं रक्तं सर्वार्थसिद्धिदम् ॥ ५९ ॥

सकारं शक्तिरूपं स्यात् रक्तं स्थितिकरं भवेत् ।
हकारं शिवबीजं स्यात् शुद्धस्फटिकसन्निभम् ॥ ६० ॥

अणिमाद्यष्टसिद्धिं तु भुक्तिमुक्तिप्रदायकम् ।
ळकारं चात्मतत्वं स्यात् रक्ताभं सर्वसिद्धिदम् ॥ ६१ ॥

विद्यातत्वं क्षकारं स्यात् क्षीराभं तु सुखप्रदम् ।
इत्येते ह्यधिदेवाश्च फलं वर्णाः क्रमेण तु ॥ ६२ ॥

अकारादि क्षकारान्ताः समासात् परिकीर्तिताः ।
कला जीवमिति ख्यातं सकलं देहमुच्यते ॥ ६३ ॥

कलाश्च विकलाश्चैव देहिदेहमिति स्मृतम् ।
देहिरूपं द्विधाप्रोक्तं स्थूलसूक्ष्मं तथैव च ॥ ६४ ॥

देहमेकं समुद्दिष्टं केवलं सूक्ष्ममुच्यते ।
अकारादि विसर्गान्तं केवलं तु स्वराकृतिः ॥ ६५ ॥

तत्स्थूलमिति विज्ञेयं सूक्ष्ममध्ये स्थितिर्भवेत् ।
ककारादीनि वर्णानि विकलं तु परिस्थितम् ॥ ६६ ॥

तद्रूपश्चार्धमात्रन्तु सूक्ष्मरूपमिहोच्यते ।
एवं कला च विकला स्थूलसूक्ष्माकृतिर्भवेत ॥ ६७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

कलानां तत्त्ववर्णानि सञ्जीवन(सजीवार्ण)मिति स्मृतम् ।
कलाहीनन्तु यद्वर्णं देहं तस्य विनिर्दिशेत् ॥ ६८ ॥

देहे देहीं सुसंयोज्य जीवे जीवं नियोजयेत् ।
सर्वेषां देहभेदोस्ति आत्मभेदो न विद्यते ॥ ६९ ॥

आत्मनां जीवमित्युक्तं जीवे जीवमिति स्मृतम् ।
तस्माज्जीवात् परं नास्ति पश्चान्न च विनिर्दिशेत् ॥ ७० ॥

तस्माद्धि जीवदेहेषु कालबीजं सुयोजयेत् ।
प्रत्येकं वर्णरूपं च देवतात्मकमुच्यते ॥ ७१ ॥

देवानां बीजनामानि वर्णास्तत्र प्रकल्पिताः ।
तस्माद्वर्णानि चोक्तानि ज्ञात्वा मन्त्रं समुद्धरेत् ॥ ७२ ॥

देवतास्थापने काले लिङ्गे वा कौतुकेऽपि वा ।
दीक्षायां प्रोक्षणे काले सकलीकरणे तथा ॥ ७३ ॥

वर्णानि विन्यसेद्धीमान् मूर्धादिक्रमशस्तथा ।
एवमेतत्क्रमेणैव ज्ञात्वा वर्णान्विशेषतः ॥ ७४ ॥

तत्तद्वर्णाकृतिं ध्यात्वा जपेत्सर्वार्थसिद्धिदम् ।
वर्णभेदमिति प्रोक्तं चक्रभेदं ततः शृणु ॥ ७५ ॥

इति श्रीवातुलोत्तरतंत्रे शुद्धाख्ये सहस्रग्रंथसंहितायां
वर्णभेदो नाम
॥ द्वितीयः पटलः ॥

3

॥ अथ चक्रभेदपटलः ॥

श्रीशाजाखिल देवता प्रतिलसत् दृग्भिः जगत् काशयत्
सान्निध्यात् सकलस्य जन्मविलय स्थैर्यं सदा कारयत् ।
साक्षित्वेन हृदम्बुजं च विदुषां चक्रस्य मध्ये स्थितम्
प्रासादं परमं परात्परतरं लिङ्गं बभौ हंसवत् ॥

सादीशाखिलदेवतावृतिलसत् दिग्व्याजगत्काश्रया
सान्निध्यं सकलस्य जन्मनिलयं स्थिलयं सदा कारयेत् ।
साक्षात्तेन हृदम्बुजं च विदुषां चक्रस्य मध्यस्थितम्
प्रासादं परमं परात्परतरं लिङ्गान्तभौमस्थवत् ॥

अथातस्संप्रवक्ष्यामि चक्रभेदविधिं परम् ।
सर्वदेवप्रियार्थाय सर्वलोकहिताय च ॥ १ ॥

मन्त्राणां बोधनार्थाय चक्ररूपं प्रकीर्तितम् ।
सर्वदेवमयं चक्रं सर्ववर्णात्मकं विदुः ॥ २ ॥

चक्ररूपं तु तत्साक्षाच्छिवज्ञानस्वरूपकम् ।
तस्मात्तस्य स्वरूपं तु लक्षणं चाधिदैवतम् ॥ ३ ॥

वर्णन्यासक्रमं चैव संक्षेपाच्छृणु षण्मुख ।
महेंद्रे मलये सह्ये (सिंहे) केदारे मन्दराचले ।
गङ्गातीरे तथा विंध्यगह्वरे वार्धितीरके ॥ ४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

देवालये गवां गोष्ठे नदीतीरे तटाकके
अन्येषु पुण्यदेशेषु देशिकस्य गृहेऽपिवा ॥ ५ ॥

(अन्येषु शुद्धदेशेषु देशिकस्य गृहे तथा ।)
इत्येतैर्युक्त देशेषु चक्रमुद्धारयेत् क्रमात् ॥ ६ ॥

भूप्रदेशे शुभे रम्ये निम्नोन्नत विवर्जिते ।
नाभिमात्रं खनित्वा कुं(तु)पांसुना पूरयेत्ततः ॥ ७ ॥

तद्वोर्ध्वे मंटपं कुर्यात् द्वादशस्तंभ संयुतम् ।
चतुर्द्वारसमायुक्तं रंध्राष्टाभिरलंकृतम् ॥ ८ ॥

वितानध्वजसंयुक्तं दर्भमालासमायुतम् ।
सर्वालङ्कारसंयुक्तं तरंगेणैव वेष्टितम् ॥ ९ ॥

दर्पणोदरसंकाशं गोमयेनापिलेपयेत् । (नोपलेपयेत्)
देशिकस्तु शुचिर्भूत्वा क्षीरभुग्विजितेंद्रियः ॥ १० ॥

पूर्वरात्राधिवासश्च प्रभाते यंत्रमुद्धरेत् ।
सुस्नाप्याचम्य विधिवत्सकळीकृतविग्रहः ॥ ११ ॥

पुण्याहं वाचयित्वातु प्रोक्षयेद्द्रुद्रियेणतु ।
रंगेन धातुना चैव तन्मध्ये चक्रमालिखेत् ॥ १२ ॥

पूर्वापरगतं तत्र युग्मसूत्रं तु कारयेत् ।
विस्तारं द्वादशाङ्गुल्यं तथा वै दक्षिणोत्तरम् ॥ १३ ॥

मध्यमे चतुरश्रं तु वृत्तं तत्कर्णिका भवेत् ।
युग्माङ्गुलेन तब्दाह्ये त्रिवृत्तं भ्रामयेन्दुधः ॥ १४ ॥

एकाङ्गुलेन तद्बाह्ये त्रीणि वृत्तानि कारयेत् ।
बाह्ये तु मुकुलाकारान् द्वात्रिंशत्परितो लिखेत् ॥ १५ ॥

कर्णिकायास्तु परितश्चाष्टपत्रं समालिखेत् ।
तब्दाह्ये चाष्टपत्रं तु कृत्वा चोपदळानि वै ॥ १६ ॥

अष्टदिक्षु समंतात्तु पक्षे पक्षे गुणागुणम् ।
तृतीयावरणे बाह्ये दळांश्चोपदळान्कुरु ॥ १७ ॥

कर्णिकामध्यके कुर्याद्रन्ध्रं तत्सूक्ष्मकर्णिका ।
तद्बाह्ये परितो लेख्या चतुष्पत्रं सकेसरम् ॥ १८ ॥

राजसेनैव सूत्रं तु सात्विकेन दळानि वै ।
कर्णिका पीतवर्णेन बीजानि तमसैव तु ॥ १९ ॥

रक्तकृष्णसितेनैव बाह्यवृत्तत्रयाणि च ।
*तद्बाह्ये मुकुळान् सर्वान् रक्तवर्णेन लेखयेत् ॥ २० ॥

चक्रन्यासमिदं प्रोक्तं देवतान्यासमुच्यते ।
कर्णिकामध्यके (मे) पूज्या शक्तिराधाररूपिणी ॥ २१ ॥

अम्बिकादिचतुश्शक्तीः चतुःपत्रेषु संयजेत् ।
वामादिशक्तयश्चाष्टौ प्रथमावरणे यजेत् ॥ २२ ॥

अष्टमूर्तिगणाश्चैव द्वितीयावरणे यजेत् ।
शर्वः पशुपतिश्चोग्रः रुद्रश्चैव भवस्तथा ॥ २३ ॥

ईशानश्च महादेवः भीमश्चेत्यष्टमूर्तिपाः ।
विघ्नेशान् लोकपालांश्च वसूंश्चैव तृतीयके ॥ २४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

बाह्यरेखात्रये पूज्यं मण्डलत्रितयं तथा।
धरो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः ॥ २५ ॥

प्रत्यूषश्च प्रभासश्च वसवोष्टाविति स्मृताः।
गंधपुष्पादिभिश्चैव पूर्वादीनि स्वनामतः।
देवतान्यासमेवोक्तं वर्णन्यासमथोच्यते ॥ ॥ २६ ॥

कर्णिकायां तु तन्मध्ये शिवबीजं तु विन्यसेत्।
पूर्वपत्रे न्यसेद्बिंदुमात्मबीजं तु दक्षिणे ॥ २७ ॥

वरुणे सूक्ष्मनादं तु विद्याबीजं तथोत्तरे।
एवं तत्तद्दळे न्यस्य पंचरूपं षडानन ॥ २८ ॥

तद्बाह्येतु दळान्सर्वान् क्रमाद्वर्णान्प्रविन्यसेत्।
एकद्वित्रितयेचैव एकद्वित्रितयं न्यसेत्, ॥ २९ ॥

सं च अं च समूर्तिंच कं च भावंच गंच वै।
षंच इंच समूर्तिंच घंच भावंच चंच वै ॥ ॥ ३० ॥

शंच उंच समूर्तिंच छंच भावंच झंच वै।
वंच ऋंच समूर्तिंच टंच भावंच ठंच वै ॥ ३१ ॥

लंच लृंच समूर्तिंच डंच भावंच णंच वै।
रंच एंच समूर्तिंच तंच भावंच दंच वै ॥ ३२ ॥

यंच ओंच समूर्तिंच धंच भावंच पंच वै।
मंच अंच समूर्तिंच फंच भावंच क्षंच वै ॥ ३३ ॥

एतान्वर्णांश्च पूर्वादीन्विन्यसेत्प्रथमादिषु।
एतच्चक्रं महासेन रहस्यमतिदुर्लभम् ॥ ३४ ॥

वर्णानामधिदेवांश्च पूजयेत्तु यथाक्रमम्।
प्रासादादीनि मन्त्राणि सर्वमस्मिन्व्यवस्थितम् ॥ ३५ ॥

एतच्च पूजयेन्नित्यं सर्वपूजासमं भवेत्।
रोचना कुंकुमाभ्यां तु कर्पूरागरुचंदनैः ॥ ३६ ॥
भूर्जपत्रे लिखेच्चक्रं गुळिकां कारयेद्बुधः।
शिरसा धारयित्वा तु सर्वकामार्थसिद्धिदम् ॥ ३७ ॥

आयुरारोग्यमैश्वर्यं पुत्रपौत्राभिवर्धनम्।
सर्वरक्षाकरं चैव सर्वव्याधिनिवारणम् ॥ ३८ ॥

सर्वदुःखप्रशमनं सर्वक्षुद्रनिवारणम्।
भूतप्रेतपिशाचाश्च भेताळब्रह्मराक्षसाः ॥ ३९ ॥

यन्त्ररूपधरं दृष्ट्वा दूराद्गच्छन्ति भीरवः।
चक्रभेदमिदं प्रोक्तं वर्गभेदं ततः शृणु ॥ ४० ॥

इति श्रीवातुलोत्तरतन्त्रे शुद्धाख्ये सहस्रग्रंथसंहितायां
चक्रभेदो नाम
॥ तृतीयः पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

॥ अथ वर्गभेदपटलः ॥

अष्टत्रिपंचपरभेदकळादिवर्गं
वर्गत्रयोद्धृतं सुभूरिमहामनूनाम् ।
मध्ये द्वयं परममाद्यमनन्तशक्तिं
प्रासादमन्त्रमनिशं प्रणमामि नित्यम् ॥

वर्गभेदं प्रवक्ष्यामि समासाच्छृणु षण्मुख ।
वर्गन्तु त्रितयं प्रोक्तं प्रथमं स्थितिरुच्यते ॥ १ ॥

द्वितीयं सृष्टिवर्गं स्यात् संहारन्तु तृतीयकम् ।
स्थितिमार्गः त्रिवर्गं स्यात् सृष्टिश्चाष्टविधा भवेत् ॥ २ ॥

संहारः पञ्चवर्गं स्यात् तेषां लक्षणमुच्यते ।
चक्रे यथा स्थितं वर्णं तथा वै स्थितिरुच्यते ॥ ३ ॥

प्रथमावरणे वर्गं सकारादीनि चाष्टकम् ।
प्रथमं वर्गइत्युक्तं सात्विकं नाम चोच्यते ॥ ४ ॥

द्वितीयावरणे वर्णमकारादीनि षोडश ।
द्वितीयं वर्गइत्युक्तं राजसं तु प्रशस्यते ॥ ५ ॥

तृतीये तु ककारादि चतुर्विंशाक्षरं तथा ।
तृतीयं वर्गमित्युक्तं तामसं चेति कीर्तितम् ॥ ६ ॥

वर्गभेदमिदं प्रोक्तं स्थितिमार्गं प्रकीर्तितम् ।
पञ्चप्रासादमन्त्राणि स्थितिमार्गेण चोद्धरेत् ॥ ७ ॥

एवं स्थितिक्रमं प्रोक्तं सृष्टिमार्गं ततः शृणु ।
अकारादिक्षकारान्तवर्णानां सृष्टिरुच्यते ॥ ८ ॥

तस्मात्सृष्टिक्रमेणैव अष्टवर्गाणि चोच्यते ।
अवर्गं प्रथमं विद्यादैन्द्रीवर्गमुदाहृतम् ॥ ९ ॥

द्वितीयं तु कवर्गं स्यात् वह्निवर्गमुदाहृतम् ।
चवर्गं तु तृतीयं स्यात् याम्यवर्गमुदाहृतम् ॥ १० ॥

टवर्गं तु चतुर्थं स्यात् नैऋत्यं वर्गमुच्यते ।
पञ्चमं तु तवर्गं स्यात् वारुणं वर्गमुच्यते ॥ ११ ॥

पवर्गं षष्ठमाख्यातं मरुद्वर्गमुदाहृतम् ।
सप्तमं तु यवर्गं स्यात् कौबेरं वर्गमुच्यते ॥ १२ ॥

अष्टमं तु शवर्गं स्यादीशवर्गमुदाहृतम् ।
एते वै चाष्टवर्गाश्च सृष्टिमार्गमुदाहृतम् ॥ १३ ॥

सदाशिवस्य मन्त्रस्तु पञ्चब्रह्माङ्गमेव च ।
सौम्यमन्त्राश्च सर्वे च सृष्टिमार्गेण चोद्धृताः ॥ १४ ॥

एवं सृष्टिक्रमं प्रोक्तं संहारं च ततश्शृणु ।
क्षकारादि अकारान्तं संहारमिति चोच्यते ॥ १५ ॥

क्षकारादि यकारान्तं दशकं प्रथमं विदुः ।
पार्थिवं वर्गमित्युक्तं म(क्ष)कारादि दशाक्षरम् ॥ १६ ॥

द्वितीयं वर्गमित्युक्तं ह्यापोवर्गमुदाहृतम् ।
णकारादि चकारान्तं तृतीयं चाऽनलं विदुः ॥ १७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

ङकारादि ककारान्तं चतुर्थं मारुतं विदुः ।
अःकारादि अकारान्तं रुद्रान्तं व्योमवर्णकम् ॥ १८ ॥

एते वै पञ्च वर्गाश्च संहाराश्चेति कीर्तिताः ।
रौद्रमन्त्राणि सर्वाणि संहारेण समुद्धरेत् ॥ १९ ॥

एवं त्रिवर्गभेदानि कीर्तितानि समासतः ।
वर्गभेदमिदं प्रोक्तं वर्ग(र्ण)नामान्यथ श्रृणु ॥ २० ॥

चक्रे तु कर्णिकादीनि वर्णानि च यथाक्रमात् ।
वक्ष्ये नामानि संक्षेपात् श्रृणु तत्वं शिवाधि(दि)कम् ॥ २१ ॥

नादं गुह्यं परं जीवं देहीभूतं च पञ्चमम् ।
सान्तं तत्वान्तभूतान्तं शिवार्णा शून्यमव्ययम् ॥ २२ ॥

एते पर्यायनामानि हकारस्य विधीयते ।
सूक्ष्मत्वाद्घोषरूपत्वात् नादमित्यभिधीयते ॥ २३ ॥

चराचरादिभूतेषु जीवरूपं हृदिस्थितम् ।
तस्माद्गुह्यमिदं प्रोक्तं परं भावात्परं स्थितम् ॥ २४ ॥

स्थूलं शब्द इति प्रोक्तं सूक्ष्मंचिन्तामयं भवेत् ।
चिन्तया रहितं यत्तु तत्परं परिकीर्तितम् ॥ २५ ॥

शिवो जीव इति ज्ञेयः तस्माज्जीव इति स्मृतम् ।
शिवाद्यवनिपर्यन्तं देहत्वाद्देहि चोच्यते ॥ २६ ॥

अकायत्वादजीवत्वात् भूतश्चेति प्रकीर्तितम् ।
तत्वाद्यनुक्रमाद्व्योम पञ्चतत्वाच्च पञ्चमम् ॥ २७ ॥

सकारस्य परं तस्मात्सान्तश्चेति प्रकीर्तितम् ।
कालाग्न्यादि शिवान्तत्वात् तत्वान्तमिति कीर्तितम् ॥ २८ ॥

पृथिव्यादि क्रमाद्व्योम भूतान्तमिति कीर्तितम् ।
सर्वव्यापिप्रभावत्वात् शिवार्णमिति कीर्तितम् ॥ २९ ॥

वाङ्मनोतीतभावत्वात् शून्यं चेति प्रकीर्तितम् ।
अक्षीणत्वात् महासेन अव्ययं चेति कीर्तितम् ॥ ३० ॥

एते पर्यायनामानि हकारस्याभिधीयते ।
कर्णिकाबीजमेवोक्तं केसराणि तथोच्यते ॥ ३१ ॥

प्रवक्ष्ये केसराणां च चतुष्पत्रेषु वर्णकान् ।
आधारशक्तिकार्यं च परबिन्दुरिति स्मृतम् ॥ ३२ ॥

एते वै पञ्चनामानि बिन्दुपर्यायवाचकाः ।
ळकारमात्मबीजञ्च देहिक्षेत्रज्ञभोगिनः ॥ ३३ ॥

एते वै पञ्चनामानि ळकारस्याभिधीयते ।
ऐकारश्च शिवाधेयं परं नादान्तमेव च ॥ ३४ ॥

एते वै पञ्चनामानिं नादपर्यायवाचकाः ।
विद्याबीजं क्षकारं च कूटं वर्णं तथैव च ॥ ३५ ॥

वर्गान्तं चैव पञ्चैते क्षकारस्याभिधीयते ।
बिन्दुरादि चतुर्थानि कर्णिकाबीजमिष्यते ॥ ३६ ॥

सकारं शक्तिबीजं स्यात् प्रथमं शुक्लधातुकम् ।
षकारं द्वितयं भानुरविमज्जादिवाकरम् ॥ ३७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

शकारं श्रीरमालक्ष्मीरस्ति च त्रितयं विदुः ।
वकारं वरुणं ह्यापः चतुर्थं मेदसि स्थितम् ॥ ३८ ॥
लकारं पञ्चमं चेन्द्रं मांसं च धरणी मही ।
रकारं चानलं रक्तं षष्ठं क्रोधश्च पावकः ॥ ३९ ॥
यकारं चानिलं स्नायु सप्तमं मारुतं तथा ।
मकारं कालमृत्युश्च अष्टमं मृत्युकारकम् ॥ ४० ॥
एते प्रथमवर्गस्य त्वेतत् नामप्रकीर्तिताः ।
द्वितीयं तु कला ज्ञेयं तत्कलाद्यक्षरं शृणु ॥ ४१ ॥
आदिबीजं च वर्णादि वर्गादि च कलादि च ।
स्वरादिश्चैव मात्रादिरादिप्रकृतिरेव च ॥ ४२ ॥
जीवादिश्च कलामात्रा आदिश्चैव स्वरस्तथा ।
एते पर्यायनामानि ज्ञात्वा मन्त्रान्समुद्धरेत् ॥ ४३ ॥
आकारादीनि शेषाणि कलाश्चेति प्रकीर्तिताः ।
तृतीयं वरणे वर्णात् विकलाश्च प्रकीर्तिताः ॥ ४४ ॥
वर्णानां चैव वर्गाणामेवमेव प्रकीर्तितम् ।
एवं हि वर्गवर्णानि ज्ञात्वा मन्त्रान्समुद्धरेत् ॥ ४५ ॥
वर्गभेदमिदं प्रोक्तं मन्त्रभेदमथशृणु ॥

इति श्रीवातुलोत्तरतंत्रे शुद्धाख्ये सहस्रग्रंथसंहितायां
वर्गभेदो नाम
॥ चतुर्थः पटलः ॥

॥ अथ मन्त्रभेदपटलः ॥

यो मन्त्रान्तरदिव्ययोगनिरतैः भावस्यतां हृत्स्थले
तारांग्रे शिवलिङ्गमूर्ध्निविलसच्चक्रान्तराळे स्थितः ।
सर्वैरात्मभिराननेषु सततं जप्यं स्वशक्तयायुते
मन्ये तं विपरीतजप्यमनघं मन्त्रं महासिद्धिदम् ॥

अथातस्संप्रवक्ष्यामि मन्त्रभेदविधिं परम् ।
भुक्तिदं मुक्तिदं चैव सर्वकामार्थसिद्धिदम् ॥ १ ॥
मन्त्रन्तु देवतारूपं मन्त्ररूपमिदं जगत् ।
परार्धकोटिमन्त्राश्च शिववक्त्राद्विनिर्गताः ॥ २ ॥
कर्षणादि क्रियास्सर्वाः मन्त्रेणैव प्रकीर्तिताः ।
तस्मान्मन्त्रं क्रियार्थत्वाद्विना मंत्रं क्रिया न च ॥ ३ ॥
मन्त्रेण देवता स्थाप्या मन्त्रेण यजनादयः ।
स्नानं मन्त्रेण कर्तव्यं मन्त्रेणाहुतितर्पणम् ॥ ४ ॥
प्रायश्चित्तं तु मन्त्रेण दीक्षामन्त्रेण चैव हि ।
अणिमादीनि मन्त्रेण सालोक्यादिपदं ततः ॥ ५ ॥
मन्त्रेण पातकादीनि मुच्यन्ते सर्वजन्मिनाम् ।
सर्वमन्त्रक्रियाश्चैव मन्त्रं शृणु षडानन ॥ ६ ॥
मननं सर्वपक्षेषु त्राणं संसारसागरात् ।
मननत्राणधर्मित्वान्मन्त्रमित्यभिधीयते ॥ ७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

यथादरः स्वनाम्नातु जनसन्निहितो भवेत् ।
तथा मन्त्रप्रयोगेण तत्र सन्निहितः शिवः ॥ ८ ॥

तस्मान्मन्त्रं महासेन रहस्यं न प्रकाशय ।
पूर्वोक्तदेशे कृत्वा तु मण्टपं लक्षणान्वितम् ॥ ९ ॥

गोमयेनाऽनुलिप्याऽथ मण्टपं भूषयेत्ततः ।
अस्त्रमन्त्रेण संप्रोक्ष्य तन्मध्ये चक्रमालिखेत् ॥ १० ॥

कर्णिका केसरांश्चैव दळांश्चोपदळांस्तथा ।
क्रमेणैव तु संलेख्य आधारादीन् प्रपूजयेत् ॥ ११ ॥

तन्मध्ये शिववीजादि वर्णानि विन्यसेत्क्रमात् ।
वीजानामधिपांश्चैव गन्धपुष्पादिनार्चयेत् ॥ १२ ॥

तच्चक्रे स्थितिमार्गेण प्रासादं तु समुद्धरेत् ।
प्रा शब्दं स्याच्छिवं ज्ञेयं सा शब्दं शक्तिरुच्यते ॥ १३ ॥

तत्स्वरूपं तु दं शब्दं त्रिवर्णमभिधीयते ।
दानेन मुक्तिदं यस्मात्तस्मात्प्रासादमुच्यते ॥ १४ ॥

अज्ञानज्ञानविज्ञेयं त्रिविधं विद्यते क्रमात् ।
अन्धकारवदज्ञानं ज्ञानं दीप्तिवदुच्यते ॥ १५ ॥

ज्ञेयं भास्करवत् प्रोक्तं इति ज्ञानं विशिष्यते ।
शिवज्ञानात्परं ज्ञानं न हि लोकेषु विद्यते ॥ १६ ॥

प्रासादं पञ्चधा प्रोक्तं तद्भेदं वक्ष्यतेऽधुना ।
शुद्धोमूलस्तथा तत्वमादिरात्मेति पञ्चधा ॥ १७ ॥

पञ्चप्रासादमित्युक्तं शुद्धप्रासादमुच्यते ।
शुद्धं शिवमिति ज्ञेयं तस्मात् शुद्धं प्रकीर्तितम् ॥ १८ ॥

नादाख्यं यत्परं वीजं सर्वभूतव्यवस्थितम् ।
तच्छुद्धमिति विज्ञेयं सर्वकारणकारणम् ॥ १९ ॥

नादं गुह्यं परं वीजं देहीभूतं च पञ्चमम् ।
सान्तं भूतान्ततत्वान्तं शिवार्णं शून्यमव्ययम् ॥ २० ॥

मुक्तिदं परमं दिव्यं सर्वसिद्धिप्रदायकम् ।
तद्विदित्वा महासेन देशिकः पाशहा भवेत् ॥ २१ ॥

शुद्धप्रासादमेवोक्तं मूलप्रासादमुच्यते ।
सर्वेषामेव तत्वानां मूलश्शिव इति स्मृतः ॥ २२ ॥

तस्मान्मूलमिति प्रोक्तं मूलमन्त्रं तदुच्यये ।
षष्ठं त्रयोदशान्तं च पञ्चमे विनियोजयेत् ॥ २३ ॥

शिवशक्तिसमायुक्तं शिवमन्त्रमिहोच्यते ।
अथर्ववेदे यः प्रोक्तो मन्त्रः प्रासादसंज्ञकः ॥ २४ ॥

सर्वाभीष्टं च कुरुते स्वाश्रितानामनारतम् ।
ब्रह्माङ्गं षड्विधं प्रोक्तं मन्त्रः प्रासादसंज्ञकम् ॥ २५ ॥

वैदिकस्तान्त्रिक इति वह्नियोगवियोगतः ।
षष्ठत्रयोदशान्तौ द्वौ वीजे त्रिदशवर्णनात् ॥ २६ ॥

बिन्दुनादौ प्रयुञ्जीत यत्तत्प्रासादमीरितम् ।
सान्तं सद्यान्तसंयुक्तं बिन्दुभूषितमस्तकम् ॥ २७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रासादाख्यो मनुः प्रोक्तः भजतां सर्वसिद्धिदम् ।
शिवमेकं विजानीयान्मन्त्रमूर्तिः परं शिवम् ॥ २८ ॥

नादं किरीटमित्युक्तं बिन्दुवक्त्रमुदाहृतम् ।
हकारं देहमित्युक्तं द्वयौ शृङ्गौ भुजौ तथा ॥ २९ ॥

वह्निपादद्वयं विद्यान्मन्त्रमूर्तिरुदाहृता ।
अकारं नादमित्युक्तं उकारं बिन्दुरुच्यते ॥ ३० ॥

स्थूलं सूक्ष्मं परं चैव त्रिविधं तु प्रकीर्तितम् ।
स्थूलं वर्णाकृतिं विद्यात् सूक्ष्मं तच्छब्दमुच्यते ॥ ३१ ॥

अकारादिक्षकारान्तं पाञ्चभौतिकमुच्यते ।
पञ्च पञ्च प्रयुञ्जीत पञ्चाशद्वर्णमीरितम् ॥ ३२ ॥

अन्तो यत्पञ्चमं बीजं तत्परं परिकीर्तितम् ।
पाञ्चभौतिकसम्बन्धं जीवाधार इति स्मृतम् ॥ ३३ ॥

एवं ज्ञात्वातु मन्त्रज्ञः सर्वपापात्प्रमुच्यते ।
एवं वै पञ्चभूतित्वं जीवप्रासादमुच्यते ॥ ३४ ॥

ब्रह्मादिस्तम्बपर्यन्तं जगद्योनिश्चराचरम् ।
चराचरादिभूतानां प्राणरूपश्शिवःस्मृतः ॥ ३५ ॥

कालाग्निशिवपर्यन्तं मन्त्रैस्सर्वं व्यवस्थितम् ।
स्थावरं जङ्गमं चैव दृश्यादृश्यं तथैव च ॥ ३६ ॥

स्थूलसूक्ष्मपरं चैव सकलं निष्कलं तथा ।
सर्वमेतज्जगद्ब्रह्म त्रैलोक्यं सचराचरम् ॥ ३७ ॥

भूतं भव्यं भविष्यद्यत्प्रासादे सर्वमुद्धृतम् ।
मूलप्रासादमित्युक्तं तत्वप्रासादमुच्यते ॥ ३८ ॥

तत्वं हि शिवभावत्वात् शिवमन्त्रमिति स्मृतम् ।
तत्वं चैवादिबीजं च तत्वान्ते विनियोजयेत् ॥ ३९ ॥

कार्यकारणसंयुक्तं सर्वतत्वात्मकं विदुः ।
तत्वप्रासादमित्युक्तमादिप्रासादमुच्यते ॥ ४० ॥

आदिस्तु पूर्वभावित्वात् आदिरित्यभिधीयते ।
प्रथमं चतुर्दशं चैव जीवान्ते विनियोजयेत् ॥ ४१ ॥

आधाराधेयसंयुक्तमादिबीजमिहोच्यते ।
आदिशक्तिः स्वबीजेन संयोगादभिधीयते ॥ ४२ ॥

एतच्छिवमयं बीजं सर्वसिद्धिकरं परम् ।
कळाचतुर्दशार्णं च जीवान्ते विनियोजयेत् ॥ ४३ ॥

आधाराधेयसंयुक्तं सर्वसिद्धिप्रदायकम् ।
आदिप्रासादमित्युक्तं आत्मप्रासादमुच्यते ॥ ४४ ॥

आत्मानं जीवमित्युक्तं जीवश्शिव इति स्मृतः ।
तस्मादेतच्छिवार्णत्वात् शिवमन्त्रमिति स्मृतम् ॥ ४५ ॥

भूतान्तं तु समुद्धृत्य आदिप्रकृतिसंयुतम् ।
प्रथमं तु समुद्धृत्य आदिप्रकृतिसंयुतम् ॥ ४६ ॥

तयोर्मध्यगतं शक्तिमात्मबीजमितिस्मृतम् ।
हृत्सरोरुहमध्ये च संस्थितं सर्वकारणम् ॥ ४७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

आत्मप्रासादमेवोक्तं जीवप्रासादमुच्यते ।
एते वै शिवबीजत्वाच्छिवमन्त्रमिति स्मृतम् ॥ ४८ ॥

शुद्धादि चात्मपर्यन्तं स्थितिमार्गेण चोद्धृतम् ।
शिवमन्त्रमिदं प्रोक्तं सदाशिवमथ शृणु ॥ ४९ ॥

सादाख्यं सौम्यरूपत्वात्सृष्टिमार्गेण चोद्धृताः ।
मोक्षदश्चाभिवृद्धिश्च काम्यं शान्तिकपौष्टिकम् ॥ ५० ॥

मोक्षदं चाक्षरं पंच अभिवृद्धिः षडक्षरम् ।
काम्यमष्टाक्षरं विद्यात् शान्तिकन्तु नवाक्षरम् ॥ ५१ ॥

पौष्टिकं दशबीजं स्यात् मन्त्राः पंचविधाः स्मृताः ।
मोक्षादि पंचमन्त्राणामुद्धारो वक्ष्यतेऽधुना ॥ ५२ ॥

ईशे चतुर्थमुद्धृत्य ऐन्द्रे चतुर्दशान्वितम् ।
परापरसमायुक्तं शक्तिं चादिकलान्वितम् ॥ ५३ ॥

ईशानान्तं समुद्धृत्य प्रेन्द्रानलसमायुतम् ।
सोमान्ते द्विकलोपेतौ सोमादित्वादि संयुतम् ॥ ५४ ॥

पञ्चाक्षरमिदं प्रोक्तं मुक्तिदं परमं विदुः ।
भूतान्तं तु समुद्धृत्य सप्तसप्तस्वरान्वितम् ॥ ५५ ॥

कार्यकारणसंयुक्तं ईशाख्यं त्रिकलायुतम् ।
सोमान्तद्विकलोपेतं सोमादित्वादिसंयुतम् ॥ ५६ ॥

वरुणान्तमसंयुक्तं मारुतान्तं कलान्वितम् ।
एवं षडक्षरं प्रोक्तं सर्वसिद्धिप्रदायकम् ॥ ५७ ॥

गुह्यं चतुर्दशोपेतं शिवशक्तिसमायुतम् ।
वर्गादिजीवसंयुक्तं सोऽतिशक्तिकलान्वितम् ॥ ५८ ॥

*भूतान्तमादिप्रकृतिकार्यकारणसंयुतम् ।
ईशे तृतीयवर्णश्च प्रथमस्वरसंयुतम् * ॥ ५९ ॥

शक्तिर्मात्रादिसंयुक्तं वारुणे तु तृतीयकम् ।
तृतीयं चास्ति संयुक्तं सोमान्तं द्विकलायुतम् ॥ ६० ॥

अनिलादि कलोपेतमेवमष्टाक्षरं विदुः ।
*सोमान्तं सोमप्रथममादिस्वरसमन्वितम् ॥ ६१ ॥

एवमष्टाक्षरः प्रोक्तः सर्वसंपत्प्रदायकः । *
भूतान्तं तु समुद्धृत्य षट्पंचत्रिकलायुतम् ॥ ६२ ॥

गुह्यमात्रादिसंयुक्तं शक्तिं तस्योपरि न्यसेत् ।
शक्तिमन्त्रादिसंयुक्तं सप्तमान्तं द्विसंयुतम् ॥ ६३ ॥

अनिलान्तमादिभूतान्तं लयादिवरुणान्तकम् ।
तयोर्मध्यगतं यान्तं आदिबीजेन संयुतम् ॥ ६४ ॥

सप्तमाद्यं समुद्धृत्य षट्पंचमकलायुतम् ।
बिन्दुनादसमायुक्तं एवं नवाक्षरं विदुः ॥ ६५ ॥

*एतद्वै परमं बीजं सर्वसिद्धिप्रदायकम् ।
परात्परं समुद्धृत्य ऐन्द्रे चतुर्दशान्वितम् ॥ ६६ ॥

कार्यकारणसंयुक्तं शक्तिजीवसमन्वितम् ।
ईशे तृतीयकं चाधोपरि द्वितीयजीवयुक् ॥ ६७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमान्तं द्विसंयुक्तं षष्ठान्तं षट्कलान्वितम् ।
भूतान्तं तु समुद्धृत्य वह्निं तस्योपरि न्यसेत् ॥ ६८ ॥

पंचमान्तं कलोपेतं भान्तमेकारसंयुतम् ।
पंच पंचममादिस्स्यात् षष्ठान्तं सप्तमादिकम् ॥ ६९ ॥

बिन्दुनादसमायुक्तं दशबीजमिहोच्यते ।
एते पंचविधाः प्रोक्ता मन्त्राः पंचाक्षरादयः ॥ ७० ॥

सदाशिवमिदं प्रोक्तं महेशं शृणु षण्मुख ।
महेशं रुद्रमूर्तित्वात्संहारेण समुद्धरेत् ॥ ७१ ॥

तस्य भेदस्त्रिधा ज्ञेयः सृष्टिस्थितिलयस्तथा ।
भूमौ तृतीयमुद्धृत्य सलिलाद्यसमन्वितम् ॥ ७२ ॥

भूमौ नवार्णकं विद्यात् अम्बरे तु षडक्षरम् ।
आधाराधेयसंयुक्तं सृष्टिबीजमिहोच्यते ॥ ७३ ॥

पृथिव्यां तु तृतीयं स्यात् व्योमान्तेन समन्वितम् ।
शक्तिं तस्योपरिन्यस्य तद्वर्गे तुर्यकं भवेत् ॥ ७४ ॥

वह्निर्मात्रादिसंयुक्तः वरुणाद्यं नमादियुक् ।
सप्तमाद्यं त्वादियुक्तं वातान्तं त्वादिसंयुतम् ॥ ७५ ॥

सप्ताक्षरं विन्दुयुक्तं भवेदेकाक्षरो मनुः ।
ईशे वर्गे तुर्यमैन्द्रे चतुर्दळकळान्वितम् ॥ ७६ ॥

कार्यकारणसंयुक्ता शक्तिरादिकळान्विता ।
शक्तिर्मात्रादिसंयुक्ता मज्जामात्रादिसंयुता ॥ ७७ ॥

सप्तमांतसमायुक्तं षष्ठांतं षष्ठबीजयुक् ।
भूतांतं तु समुद्धृत्य क्षं च मांतकळान्वितम् ॥ ७८ ॥

वैश्वानरसमायुक्तं भांतमेकारसंयुतम् ।
वरुणांतं च मात्रादियुक्तं षष्ठांतमादियुक् ॥ ७९ ॥

सप्तमस्यादि बीजं च प्रथमस्वरसंयुतम् ।
नवाक्षरं विंदुयुक्तं दशवर्णमनुस्मृतः ॥ ८० ॥

एते पंचविधामंत्राः प्रोक्ताः पंचाक्षरादयः ।
सदाशिव इति प्रोक्तो महेशं शृणु षण्मुख ॥ ८१ ॥

महेशो रुद्रमूर्तित्वात्संहारेण समुद्धरेत् ।
तस्य भेदस्त्रिधा ज्ञेयस्सृष्टिस्थितिलयास्तथा ॥ ८२ ॥

भूमौ तृतीयमुद्धृत्य चांतरिक्षांतबिंदुयुक् ।
तोयादिरभ्रांतविंदुयुक्ता भूमौ नवाक्षरम् ॥ ८३ ॥

नभोंतविंदुसंयुक्तमम्बरे तु षडक्षरम् ।
आधाराधेयसंयुक्तं सृष्टिबीजमिति स्मृतम् ॥ ८४ ॥

पृथिव्यां तु तृतीयार्णं शांतविंदुसमन्वितम् ।
तद्वर्गे तुर्यमुद्धृत्य सुरमार्गांतविन्दुयुक्* ॥ ८५ ॥

लयाद्यमनिलं चैव पार्थिवान्तेन संयुतम् ।
व्योमे षष्ठसमायुक्तं कार्यकारणसंयुतम् ॥ ८६ ॥

स्थितिबीजमिदं प्रोक्तं संहारमधुनोच्यते ।
महीवर्गे तृतीयं स्यात् व्योमान्तेन समायुतम् ॥ ८७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

शिवशक्तिसमायुक्तं पृथिव्यादि समुद्धरेत्।
*कार्यकारणसंयुक्तं जलाद्यं शान्तबिन्दुयुक् ॥ ८८ ॥

द्वितीयाद्यं समुद्धृत्य तेजो वै पार्थिवान्तकम्।
*अन्तरिक्षांतसंयुक्तं कार्यकारणसंयुतं ॥ ८९ ॥

व्योमे षड्वर्णकं विन्दुसंहारमिति कीर्तितम्।
महेशमेवमाख्यातं शक्तिवीजमथ श्रुणु ॥ ९० ॥

शक्तिवीजं समुद्धृत्य विकृतिर्वह्निसंयुतम्।
विन्दुनादसमायुक्तं शक्ति (शिव) वीजमिदं परम् ॥ ९१ ॥

प्रथमा शक्तिरित्युक्ता द्वितीया शक्तिरुच्यते।
नादाद्यं तु समुद्धृत्य षष्ठं मायासमन्वितम् ॥ ९२ ॥

विन्दुनादसमायुक्तं द्वितीया शक्तिरुच्यते।
तत्वान्ताद्यं धरावह्निविन्दुनादसमन्वितम् ॥ ९३ ॥

तृतीया शक्तिरित्युक्ता जीवाद्यं वह्निसंयुतम्।
जीवाद्यं द्वादशकला वैश्वानरसमन्वितम् ॥ ९४ ॥

विन्दुनादसमायुक्तं चतुर्थी शक्तिरीरिता।
भूतान्ताद्यं समुद्धृत्य चतुर्दशकळान्वितम् ॥ ९५ ॥

वह्निविन्दुसमायुक्तं पञ्चमी शक्तिरीरिता।
एतासां पञ्चशक्तीनामुमाशक्त्यादिरेव च ॥ ९६ ॥

उमाम्बिका गणानी च ईश्वरी च मनोन्मनी।
मनोन्मन्याः क्रमेणैवमंश एव प्रकीर्त्यते ॥ ९७ ॥

गणवर्णं समुद्धृत्य वह्निमायासमन्वितम्।
बिन्दुनादसमायुक्तं गौरीबीजमिदं परम् ॥ ९८ ॥

अन्यासां चैव शक्तीनां स्वनामाद्यक्षरेण तु।
कार्यकारणसंयुक्तं सर्वेषां शक्तिरुच्यते ॥ ९९ ॥

मन्त्रमेवं समाख्यातो मन्त्रन्यासमथ श्रुणु।
लिङ्गस्य स्थापने काले तत्त्रमन्त्रांश्च विन्यसेत् ॥ १०० ॥

कुम्भेष्वन्तर्गतान्मन्त्रान् लिङ्गवत्परिपूरितान्।
तयोर्योगे क्रियावस्था सु (सा) प्रतिष्ठेति कीर्तिता ॥ १०१ ॥

मन्त्रमूर्तिसुसंयोगशिवसान्निध्यकारणम्।
प्राणप्रकृतियोगं तु ज्ञात्वा स्थापनमाचरेत् ॥ १०२ ॥

प्राणो मन्त्रमिति प्रोक्तं प्रकृतिं मूर्तिरुच्यते।
तस्माद्वै मन्त्रमूर्तिं च लिङ्गमध्ये तु विन्यसेत् ॥ १०३ ॥

मूर्ध्नि प्रविन्यसेच्छुद्धं मूलं वै सूत्रमध्यमे (गे)।
तत्वं तु दक्षिणे प्रोक्तं आदिं वामे तु विन्यसेत् ॥ १०४ ॥

आत्मानं सूत्रमूले च विन्यसेच्च विचक्षणः।
मन्त्रन्यासमिदं प्रोक्तं तत्वन्यासमथोच्यते ॥ १०५ ॥

कर्मेशं पुरतो न्यस्य कर्तृ सव्ये तु विन्यसेत्।
मूर्तिं च पश्चिमे न्यस्येदमूर्तं चोत्तरे न्यसेत् ॥ १०६ ॥

मूर्तिं वै चापरे न्यस्य त्वमूर्तिमितरे न्यसेत्।
ऊर्ध्वे तु शिवसादाख्यं पञ्चतत्वानि विन्यसेत् ॥ १०७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमूर्तिमयं देवं सर्वकारणकारणम् ।
अष्टत्रिंशत्कळोपेतं ध्यात्वा तु सकळीकृतम् ॥ १०८ ॥

आवाहयेत्ततो देवं पञ्चाक्षरविधानतः ।
षडक्षरेण मन्त्रेण स्थापयेत्तु विचक्षणः ॥ १०९ ॥

अष्टाक्षरेण मन्त्रेण सन्निधीकरणं कुरु ।
निवेदयेन्नवार्णेन दशबीजेन पूजय ॥ ११० ॥

पाद्यं गन्धादिकं दद्यात् ब्रह्माङ्गैस्सह बुद्धिमान् ।
सकलस्थापनाकाले तद्बीजं हृदि विन्यसेत् ॥ १११ ॥

सृष्टिमूर्तौ न्यसेत्सृष्टिं स्थितिमूर्तौ न्यसेत् स्थितिं ।
संहारे संहृतिं बीजं विन्यसेत्तु विचक्षणः ॥ ११२ ॥

शक्तीनां स्थापने काले तत्तद्बीजं हृदि न्यसेत् ।
मन्त्रभेदमिदं ज्ञात्वा आचार्यः स्थापकोत्तमः ॥ ११३ ॥

क्रियाशरीरमित्युक्तं मन्त्रं जीवमिति स्मृतम् ।
क्रियामन्त्रप्रयोगं हि शिवसान्निध्यकारणम् ॥ ११४ ॥

तस्माज्जीवं शरीरं च ज्ञात्वा सर्वं समाचरेत् ।
मन्त्रभेदमिदं प्रोक्तं प्रणवं च ततः श्रुणु ॥ ११५ ॥

इति श्रीवातुलोत्तरतंत्रे शुद्धाख्ये सहस्रग्रंथसंहितायां
मन्त्रभेदो नाम
॥ पञ्चमः पटलः ॥

॥ अथ प्रणवभेदपटलः ॥

उच्चारयन्ति यमिनः शिवसङ्गमाय
वामादिशक्तिसहितं सकलस्य हेतुम् ।
वेदादिजन्मविलयस्थितिभूमिभूतं
उच्चारयामि हृदयं प्रणवं तथान्तम् ॥

अथ प्रणवभेदं तु प्रवक्ष्यामि समासतः ।
सर्वपापहरं चैव मुक्तिदं परमं नृणाम् ॥ १ ॥

प्रणवं सर्वदेवाख्यं सर्वदेवमयं विदुः ।
सर्वेषां चैव मन्त्राणां प्रणवं प्राणमुच्यते ॥ २ ॥

प्रणवं पञ्चभेदं स्यात्तद्भेदं श्रुणु षण्मुख ।
साकल्यं शाम्भवं सौख्यं सावश्यं सायुजं तथा ॥ ३ ॥

एते वै पञ्चभेदास्तु पञ्चवक्त्रेषु चोद्धृताः ।
अकारं च उकारं च मकारं च त्रिधा भवेत् ॥ ४ ॥

तृतीयान्तर्गतं नादं चतुर्थं मुक्तिकारणम् ।
अकारो दक्षिणांशस्स्याद्वामांशस्स्यादुकारकम् ॥ ५ ॥

मकारं मध्यदेशः स्यात्तस्मात्त्रिः प्रणवात्मकम् ।
हकारं तस्य मध्ये तु संस्थितं सर्वकारणम् ॥ ६ ॥

अकारं ब्रह्मदैवत्यमुकारं विष्णुदैवतम् ।
मकारं रुद्रदैवत्यमोंकारं तु सदाशिवः ॥ ७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

नादं शिवमयं विद्यात्पञ्चदेवात्मकं विदुः ।
अकारोकारसंयोगादोंकारस्स्वर उच्यते ॥ ८ ॥

ओमित्येकाक्षरं ब्रह्म वदन्ति शिवयोगिनः ।
पंचमं प्रथमोपेतं तृतीयान्तर्गतं परम् ॥ ९ ॥

साकल्यमिति विज्ञेयं पूर्ववक्त्रे तु जायते ।
आदिबीजं चतुर्थ्यंतं भान्तं भूतान्तसंयुतम् ॥ १० ॥

चतुर्थस्वरसंयुक्तं शाम्भवः दक्षिणानने ।
वर्गादिपञ्चमं चैव षष्ठान्तं जीवसंयुतम् ॥ ११ ॥

तृतीयस्वरसंयुक्तं सौख्यं वै पश्चिमानने ।
अकारं पञ्चमान्तञ्च मकारं तत्वबीजकम् ॥ १२ ॥

एकादशकळोपेतं सावश्यं सौम्यवक्त्रके ।
आदिप्रकृतिवर्णं च पंचमान्तं षडन्तकम् ॥ १३ ॥

गुह्यं चतुर्दशोपेतं सायुज्यं चोर्ध्ववक्त्रके ।
साकल्यं रक्तवर्णं स्याच्छन्दोऽनुष्टुप् प्रकीर्तितम् ॥ १४ ॥

ऋषिस्सनत्कुमारस्तु पार्थिवं भूतमुच्यते ।
तत्वं कर्मेशमित्युक्तमीशानश्चाऽधिदैवतम् ॥ १५ ॥

मन्त्रं चतुर्भिस्संयुक्तं सर्वसिद्धिकरं परम् ।
शाम्भवं त्वंजनप्रख्यं त्रिष्टुप् छन्दः प्रकीर्तितम् ॥ १६ ॥

भारद्वाजो ऋषिर्ज्ञेयः सलिलं भूतमुच्यते ।
तत्वं कर्तृसमाख्यातमीशानमधिदैवतम्
पञ्चमात्रासमोपेतं सर्वसिद्धिप्रदायकम् ॥ १७ ॥

सौख्यं गोक्षीरवर्णं स्यात् छन्दो बृहतिरिष्यते ।
विश्वामित्रः ऋषिर्ज्ञेयस्तेजोभूतमिति स्मृतम् ॥ १८ ॥

समूर्तत्वमित्युक्तं ब्रह्मा तस्याधिदैवतम् ।
चतुर्मात्रासमायुक्तं सर्वसंपत्करं परम् ॥ १९ ॥

सावश्यं कुंकुमाभं स्यात् छन्दो जगतिरुच्यते ।
गौतमोऽस्य ऋषिर्ज्ञेयो मारुतं भूतमुच्यते ॥ २० ॥

अमूर्तं तत्वमित्युक्तमीशस्तस्याधिदैवतम् ।
पञ्चमात्रासमोपेतं सर्ववश्यकरं परम् ॥ २१ ॥

सायुज्यं स्फटिकाभासं छन्दो वै जगती स्मृतम् ।
अगस्त्योऽत्र ऋषिर्ज्ञेयो व्योमभूतमुदाहृतम् ॥ २२ ॥

शिवाख्यं तत्वमित्युक्तमधिदैवं सदाशिवः ।
पञ्चमात्रासमोपेतं सायुज्यपदमाप्नुयात् ॥ २३ ॥

प्रणवं सर्ववर्णानां शिवबीजमिति स्मृतम् ।
बिन्दुनादप्रकारेण प्रणवाकृतिरुच्यते ॥ २४ ॥

सृष्टिस्थितिनिमित्ताय उच्चारणमधोमुखम् ।
साकल्यादीनि पञ्चैते क्रमेण परिकीर्तिताः ।
प्रणवभेदमिदं प्रोक्तं ब्रह्मभेदमिदं श्रुणु ॥ २५ ॥

इति श्रीवातुलोत्तरतंत्रे शुद्धाख्ये सहस्रग्रंन्थसंहितायां
प्रणवभेदो नाम
॥ षष्ठः पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

॥ अथ ब्रह्मभेदपटलः ॥

येनेदं परया विभक्तमखिलं पञ्चादशार्णं महः
ब्रह्माख्यं निजभूतमेतदखिलं विद्याधिकाद्राजते ।
क्षेत्रक्षादि समस्तवर्णजनितं वाग्ब्रह्मश्रुत्यादि(धि)कं
विश्वोत्पत्तिविनाशसंस्थितिकृते तस्मै नमो ब्रह्मणे ॥

अथ वक्ष्ये विशेषेण ब्रह्मभेदविधिं परम् ।
बृहत्वाद्बृंहणत्वाच्च ब्रह्ममित्यभिधीयते ॥ १ ॥

ब्रह्मतत्वमिति ज्ञेयं भवेत्तद्ब्रह्म पञ्चधा ।
पञ्चब्रह्मप्रकारेण पञ्चविंशतिभेदकम् ॥ २ ॥

*एभिर्भेदैर्युतं पञ्चविंशतिस्तत्वसंयुतम् ।
इत्येतत्पञ्चभेदत्वात् ब्रह्मपञ्चकमीरितम्* ॥ ३ ॥

मूर्तिब्रह्म तथा पूर्वं तत्वब्रह्म द्वितीयकम् ।
भूतब्रह्म तृतीयं स्यात्पिण्डब्रह्म चतुर्थकम् ॥ ४ ॥

पञ्चमं तु कलाप्रोक्तं पञ्च ब्रह्म उदाहृतम् ।
एतेषां ब्रह्मपञ्चानां लक्षणं वक्ष्यतेऽधुना ॥ ५ ॥

ब्रह्मा विष्णुश्च रुद्रश्च मूर्तयः प्रणवाधिपाः ।
तस्मात्प्रणवरूपं तु मूर्तिरूपमुदाहृतम् ॥ ६ ॥

साकल्यादिस्तु यत्पंच मूर्तिब्रह्मेति कीर्तितम् ।
एतेषां चैव तत्वानां शिवतत्वं प्रभुस्स्मृतम् ॥ ७ ॥

एतच्छिवमयं बीजं शिवार्णं चेति कीर्तितम् ।
तस्माच्छुद्धादि चाऽऽत्मानं तत्वब्रह्म प्रकीर्तितम् ॥ ८ ॥

प्रथमं मांसबीजं स्यात् द्वितीयं मेदसो भवेत् ।
तृतीयं षष्ठबीजं स्यात् चतुर्थं सप्तमं तथा ॥ ९ ॥

पंचमं पंचमं विद्यात् पांचभौतिकमुच्यते ।
मांसं वै पार्थिवं बीजं मेदसो ह्याप उच्यते ॥ १० ॥

षष्ठं तेजो विनिर्दिष्टं सप्तमं मारुतात्मकम् ।
पंचमं व्योमबीजं स्यात् भूतब्रह्मेति कीर्तितम् ॥ ११ ॥

सप्तके प्रकृतौ वर्णौ तुरीयं पंचकं त्यजेत् ।
शेषेषु पंचवर्णेषु पंचमं सह योजयेत् ॥ १२ ॥

विन्दुनादसमायुक्तं पंचार्णानामनुक्रमात् ।
प्रकृतिस्वरसंयुक्तं हकारेष्वनुक्रमात् ॥ १३ ॥

*तेषां नामानि वक्ष्यामि समासाच्छृणु षण्मुख ।
सद्योजातं तथापूर्वं वामदेवं द्वितीयकम् ॥
अघोरं तु तृतीयं स्यात् चतुर्थं पुरुषं भवेत् ॥ १४ ॥

ईशानं पंचमं विद्यात् पंच नामानि चोच्यते ।
प्रणवादि चतुर्थ्यंतं स्वनामपदमध्यगम् ॥ १५ ॥

नमस्कारान्तसंयुक्तं सद्यादीन् योजयेत्क्रमात् ।
शिवार्णे शिववर्णानां संयोगात्पिंडमुच्यते ॥
कर्मेशं पिण्डरूपत्वात्पिण्डब्रह्मेति कीर्तितम् ॥ १६ ॥

ईशानं पुरुषं चैव अघोरं वामदेवकम् ।
सद्योजातं च पंचैते कला ब्रह्ममुदाहृतम् ॥ १७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

ईशानस्य कलाः पंच पुरुषस्य चतुष्कलाः ।
अघोरस्य कलाश्चाष्टौ वामदेवे त्रयोदश ॥ १८ ॥

सद्यश्चाष्टकलाः ज्ञेया अष्टत्रिंशत्कलाः स्मृताः ।
ईशानः सर्वविद्यानां प्रथमं परिकीर्तितम् ॥ १९ ॥

ईश्वरः सर्वभूतानां द्वितीयं परिकीर्तितम् ।
ब्रह्माधिपतिरित्येव ब्रह्मणोऽधिपतिस्तथा ॥
ब्रह्मेतीदं तृतीयं स्याच्छिवो मेऽस्तु चतुर्थकम् ॥ २० ॥

सदाशिवमिति ज्ञेयं पंचमं परिकीर्तितम् ।
एते ईशानरूपाश्च पंचसंख्याः प्रकीर्तिताः ॥ २१ ॥

तत्पुरुषाय विद्महे प्रथमं परिवक्ष्यते ।
महादेवाय धीमहि तन्नो चेति द्वितीयकम् ॥ २२ ॥

रुद्रस्तृतीयमित्युक्तं चतुर्थं तु प्रचोदयात् ।
एवं तत्पुरुषस्यैव चतस्रश्च कलाः स्मृताः ॥ २३ ॥

अघोरेभ्यो भवेदाद्योथघोरेभ्यो द्वितीयकः ।
घोरः स्यादपरो घोरतरेभ्यस्स्याच्चतुर्थकः ॥ २४ ॥

सर्वतः पंचमं विद्यात् षष्ठं सर्वमुदाहृतम् ।
नमस्ते अस्तु रुद्रेति सप्तमस्समुदाहृतः ॥ २५ ॥

रूपेभ्यश्चाष्टमः प्रोक्तश्चाघोरस्याष्टकं स्मृतम् ।
प्रथमं वामदेवाय ज्येष्ठायेति द्वितीयकम् ॥ २६ ॥

श्रेष्ठायेति तृतीयं स्याद्रुद्रायेति चतुर्थकम् ।
पंचमं काल इत्युक्तं कलविकरणाय नमस्तु षट् ॥ २७ ॥

सप्तमं बलमित्युक्तमष्टमं विकरणाय च ।
नवमं बलमित्युक्तं दशमं प्रमथनाय च ॥ २८ ॥

दमनायैकादशं च द्वादशं मन उच्यते ।
एतत्रयोदशकला वामदेवेति कीर्तिताः ॥ २९ ॥

सद्योजातं प्रपद्यामि प्रथमं परिकीर्तितम् ।
द्वितीयं सद्योजाताय वै नमश्चेति कीर्तितम् ॥ ३० ॥

तृतीयं तु भवश्चैव भवेति च चतुर्थकम् ।
पंचमं नातिभवे षष्ठं चेति भवस्व माम् ॥ ३१ ॥

सप्तमं तु भवं विद्यात् उद्भवं चाष्टमं भवेत् ।
एवमष्टकलाश्चैव सद्योजाते प्रकीर्तिताः ॥ ३२ ॥

ईशानादीनि सद्यांतमष्टत्रिंशत्कलाः स्मृताः ।
कलाब्रह्ममिति प्रोक्तं पंचब्रह्माणि चोच्यते ॥ ३३ ॥

अष्टत्रिंशत्कलोपेतं कलाद्यं तत्प्रकीर्तितम् ।
मूर्त्यादिकलान्तानां लक्षणं वक्ष्यते क्रमात् ॥ ३४ ॥

ईशान ईश्वरो ब्रह्मा शिवश्चेति सदाशिवः ।
पंचमूर्त्याकृतिर्यद्यत्तत्तद्वै प्रणवाकृतिः ॥ ३५ ॥

सद्यादीनां च पंचानां क्रमेण परिलक्ष्यते ।
कर्मकर्तृसमूर्तिश्च मूर्तिश्चैव शिवस्तथा ॥ ३६ ॥

पंचसादाख्यतत्वानां यद्भावं विन्यसेत्क्रमात् ।
तद्भावमात्मनादीनि शुद्धान्तानि च लक्ष्यते ॥ ३७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

INSTITUT FRANÇAIS BIBLIOTHEQUE PONDICHERY

पार्थिवं पीतवर्णं स्याच्छुक्लाभं ह्याप उच्यते ।
रक्ताभं तैजसं प्रोक्तं कृष्णाभं ह्यनिलं विदुः ॥ ३८ ॥

व्योम धूम्रनिभं विद्यादेवं भूताकृतिर्भवेत् ।
गोक्षीरं शंखवर्णाभं जटामकुटमण्डितम् ॥ ३९ ॥

चतुर्वक्त्रं चतुर्बाहुं नेत्रद्वादशभिर्युतम् ।
*सव्येतु टंकशूले चाभयं वरदमन्यके ॥ ४० ॥

शुक्लवस्त्रधरं चैव शुक्लवस्त्रोत्तरीयकम् ।*
सर्वाभरणसंयुक्तं एवं सद्यमुदाहृतम् ॥ ४१ ॥

*ईशानं पश्चिममुखं सद्योजातं च मुक्तिदम् ।
जपापुष्पनिभं वामं जटामकुटमण्डितम् ॥ ४२ ॥

चतुर्वक्त्रसमायुक्तं सर्वाभरणसंयुतम् ।
सर्वावयवसंयुक्तं सर्वाभरणसंयुतम् ॥ ४३ ॥

नेत्रैर्द्वादशभिर्युक्तं सर्वलक्षणसंयुतम् ।
रक्तवस्त्रधरं देवं रक्तवस्त्रोत्तरीयकम् ॥ ४४ ॥

दक्षिणेऽभयटंकं च वामे वरदशूलभृत् ।
(दक्षहस्तद्वयेनैव भयं टंकं दधानकम्) ॥ ४५ ॥

दधानं वरदं शूलं वामहस्तद्वयेन च ।
रक्तगन्धानुलिप्ताङ्गं रक्तमाल्यैरलंकृतम् ॥ ४६ ॥

सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ।
वामदेवमिदं प्रोक्तं सर्ववश्यकरं परम् ॥ ४७ ॥

भिन्नाञ्जनसमप्रख्यं अघोरं रौद्ररूपकम् ।
चतुर्वक्त्रं चतुर्बाहुं जटामकुटमंडितम् ॥ ४८ ॥

*महेश्वरोत्तरमुखं वामदेवमभीष्टदम् ।
सर्वशत्रुक्षयकरं नीलांजनसमप्रभम् ॥ ४९ ॥

चतुर्वक्त्रं चतुर्बाहुं जटामकुटमंडितम् ।*
द्वादशाक्षसमायुक्तं दंष्ट्राकराळमास्यकम् ॥ ५० ॥

व्याघ्रचर्मांबरधरं व्याघ्रचर्मोत्तरीयकम् ।
पादनूपुरसंयुक्तं सर्वाभरणभूषितम् ॥ ५१ ॥

दिव्यगन्धानुलिप्ताङ्गं दिव्यपुष्पैरलंकृतम् ।
टंकशूलसमायुक्तं अभयं वरदान्वितम् ॥ ५२ ॥

सर्वावयवसंयुक्तं सर्वलक्षणसंयुतम् ।
*सर्वसंपत्प्रदातारं समस्तदुरितापहम् ॥ ५३ ॥

लूतावृश्चिकसंयुक्तं कण्ठमालाविराजितम् ।*
अघोरं रूपमेवं हि सर्वशत्रुजयं भवेत् ॥ ५४ ॥

*भूतेशं तीक्ष्णवदनमेवं ध्यायेदभीष्टदम् ।
पुरुषं कुंकुमाभं स्यात् चतुर्वक्त्रं चतुर्भुजम् ॥ ५५ ॥

जटामकुटसंयुक्तं नेत्रैर्द्वादशभिर्युतम् ।
सर्वावयवसंयुक्तं पीताम्बरधरं परम् ॥ ५६ ॥

पीतवस्त्रोत्तरीयं च सर्वाभरणभूषितम् ।
सव्ये तु टंकमभयं शूलं वरदमन्यके ॥ ५७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

दिव्यगन्धानुलिप्ताङ्गं दिव्यपुष्पैरलंकृतम् ।
एवं तत्पुरुषं विद्यात्सर्वसिद्धिप्रदायकम् ॥ ५८ ॥

ईशानां स्फाटिकाभं स्यात् जटामकुटमण्डितम् ।
चतुर्वक्त्रसमायुक्तं द्वादशाक्षिसमान्वितम् ॥ ५९ ॥

चतुर्भुजसमायुक्तं सर्वलक्षणसंयुतम् ।
शुक्लाम्बरधरं सौम्यं शुक्लवस्त्रोत्तरीयकम् ॥ ६० ॥

टङ्कशूलसमायुक्तं अभयं वरदान्वितम् ।
सर्वाऽवयवसंयुक्तं सर्वाभरणभूषितम् ॥ ६१ ॥

दिव्यपुष्पैरलंकृत्य दिव्यगन्धानुलेपनम् ।
एवमीशानरूपं तु सद्यो मोक्षप्रदायकम् ॥ ६२ ॥

अघोरं रौद्रमित्युक्तं शेषं सौम्यमुदाहृतम् ।
सद्योजातं विजानीयादमूर्तिं वामदेवकम् ॥ ६३ ॥

अघोरं कर्तृरूपं स्यात्कर्म तत्पुरुषं भवेत् ।
शिवसादाख्यमीशानं पंचतत्वात्मकं विदुः ॥ ६४ ॥

पंचमूर्त्यात्मकं यत्तत्पिण्डब्रह्माकृतिर्भवेत् ।
एवं पिण्डाकृतिः प्रोक्तं कलारूपमिहोच्यते ॥ ६५ ॥

शंखकुन्देन्दुवर्णं च स्फटिकक्षीरसन्निभम् ।
ईशानस्य कलानां तु पंचवर्णाः प्रशस्यते ॥ ६६ ॥

रक्तासितश्वेतपीतास्तत्पुरुषकलाः स्मृताः ।
अंजनारुणपीतं च श्यामनीलसितारुणाः ॥ ६७ ॥

कांचनं चाष्टवर्णानि अघोरस्य कलाः स्मृताः ।
*अघोरस्य कलाश्चाष्टावंजनारुणपीतकाः ॥ ६८ ॥
श्यामनीलश्वेतरक्तकांचनाभाः प्रकीर्तिताः ।*
जपापीतांजनश्यामशुक्लश्यामांजनारुणाः ॥ ६९ ॥
अंजनं स्फटिकं रक्तं नीलं मरकतं तथा ।
एते वामकलानां तु त्रयोदश समीरिताः ॥ ७० ॥
*सद्योजातकलानां च रक्तमालासिताऽसिताः ।
रक्तं सितं तथा नीलं कृष्णं पीतं सकुंकुमम् ॥ ७१ ॥
भिन्नांजनं चारुणं च सद्योजातकलास्स्मृताः ।*
कलारूपाणि सर्वाणि त्रिणेत्राश्च चतुर्भुजाः ॥ ७२ ॥
पीतकुंकुमभिन्नांजनारुणा वर्णकाः स्मृताः ।
अभयं वरदं चैवं शूलं परशुधारिणः ॥ ७३ ॥
सर्वलक्षणसंयुक्तास्सर्वाभरणभूषिताः ।
कलारूपेषु सर्वेषु वामाद्याः शक्तयः स्थिताः ॥ ७४ ॥
अष्टत्रिंशत्कलानां तु अष्टत्रिंशच्च शक्तयः ।
एवं शक्तिसमोपेतं न्यासकाले तु विन्यसेत् ॥ ७५ ॥
मूर्तिं तत्वं तथाभूतं पिण्डं चैव तथा कला ।
पंच ब्रह्मणि चैतानि सर्वकार्येषु योजयेत् ॥ ७६ ॥
ब्रह्मभेदमिदं प्रोक्तमङ्गभेदमथ श्रुणु ॥

इति श्रीवातूलोत्तरतंत्रे शुद्धाख्ये सहस्रग्रंथसंहितायां
ब्रह्मभेदो नाम
॥ सप्तमः पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

॥ अथ अङ्गभेदपटलः ॥

ब्रह्मादिकं विश्वजगत्समूह-
मङ्गीकृतत्वात्परमेश्वरस्य ।
सर्वाणि चाङ्गानि भवन्ति तस्मा-
दङ्गेश्वरं तं सततं भजामि ॥

अतः परं प्रवक्ष्यामि अङ्गभेदविधिं परम् ।
अङ्गं षड्भेदमित्युक्तं षडङ्गं तदिहोच्यते ॥ १ ॥
षडङ्गमङ्गभेदानि षट्त्रिंशदिति तानि तु ।
एभिर्भेदैः समायुक्तमङ्गं षट्त्रिंशदुच्यते ॥ २ ॥
तेषां तु लक्षणं वक्ष्ये समासाच्छृणु षण्मुख ।
शिवाङ्गं चैव भूताङ्गं विद्याङ्गं च तथैव च ॥ ३ ॥
कूटाङ्गं चैव शक्त्यङ्गं सामान्याङ्गं तथैव च ।
एतानि चाङ्गनामानि कीर्तितानि षडानन ॥ ४ ॥
एतेषां चैवमङ्गानां शिवाङ्गं पूर्वमिष्यते ।
नवार्णविकृतिष्वेषु तुर्यं पंचममष्टमम् ॥ ५ ॥
त्रीणि वर्णानि संत्यज्य शेषाः षट् परवर्णयुक् ।
कार्यकारणसंयुक्तं सर्वेषां च षडानन ॥ ६ ॥
*तेषां च नामधेयानि वक्ष्यामि श्रुणु षण्मुख ।
प्रथमं हृदयं विद्यात् द्वितीयं तु शिरो भवेत् ॥ ७ ॥

तृतीयं तु शिखां विद्यात् चतुर्थं कवचं भवेत् ।
पंचमं नेत्रयुग्मं च षष्ठमस्त्रमुदाहृतम् ॥ ८ ॥
एते शिवाङ्गनामानि कीर्तितानि क्रमाद्विदुः । *
आदौ प्रणवमुच्चार्य शिवार्णं तदन्तरम् ॥ ९ ॥
अभिधानं चतुर्थ्यंतं नमस्कारादिभिर्युतम् ।
सृष्टि(स्रष्टुः)विंशतिकं वीजं पंचविंशतिकं ततः ॥ १० ॥
द्व्यक्षरं सविसर्गं च हृन्मन्त्रे पल्लवं स्मृतम् ।
प्राणस्य सप्तमं ह्यापो द्वितीयस्वरयुक् क्रमात् ॥ ११ ॥
खे द्वितीयस्वरं तद्वत् शिरोमन्त्रस्य पल्लवम् ।
पार्थिवान्ताक्षरं यस्य तृतीयं चाक्षरं ततः ॥ १२ ॥
दशान्तव्यंजनं तद्वत् शिखामन्त्रस्य पल्लवम् ।
चतुर्थान्तं स्वरं विन्दुनादौ च गगनाक्षरे ॥ १३ ॥
युंजीयात्कवचं मन्त्रं पल्लवं परिकीर्तितम् ।
वीजद्वये शिखायाश्च पल्लवे पूर्वमक्षरम् ॥ १४ ॥
चतुर्दशस्वरोपेतं नेत्रमन्त्रस्य पल्लवम् ।
एकविंशतिवर्णान्तं दशांतव्यंजनं तथा ॥ १५ ॥
एतदायुधमन्त्रस्य पल्लवं चेति कीर्तितम् ।
नमोन्तं हृदयं विद्यात्स्वाहान्तं च शिरो भवेत् ॥ १६ ॥
वषडन्तं शिखा ज्ञेया हुंकारं कवचस्य तु ।
वौषण्णेत्रत्रयान्तं स्यात्फट्कारं चास्त्रमन्त्रतः ॥ १७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

एवं शिवाङ्गमित्युक्तं भूताङ्गानि तथोच्यते।
पार्थिवं जीवसंयुक्तं द्वितीयं स्वरसंयुतम् ॥ १८ ॥

बिन्दुनादसमायुक्तं प्रथमं बीजमुच्यते।
शिवार्णं जीवनोपेतं चतुर्थस्वरभूषितम् ॥ १९ ॥

शिवशक्तिसमायुक्तं द्वितीयं बीजमुच्यते।
पंचमं षष्ठसंयुक्तं पंचमान्तकलायुतम् ॥ २० ॥

आधाराधेयसंयुक्तं तृतीयं बीजमुच्यते।
भूतान्तमनिलोपेतं पंचसप्तकलान्वितम् ॥ २१ ॥

परापरसमायुक्तं चतुर्थं बीजमुच्यते।
तत्वान्तं तत्वसंयुक्तं कलान्तेन समन्वितम् ॥ २२ ॥

कार्यकारणसंयुक्तं पंचमं बीजमुच्यते।
शक्त्यन्तं शिवसंयुक्तमादिबीजकलान्वितम् ॥ २३ ॥

तयोर्मध्यगतो बिन्दुः षष्ठं बीजमुदाहृतम्।
पंचभिर्ग्रंथिभिर्युक्तं छेद्यमन्त्रेण चात्मनि ॥ २४ ॥

एवं भूतांगमाख्यातं कूटाङ्गानि ततः शृणु।
प्रथमं स्यात् द्वितीयं तु चतुर्थं पंचमान्तकम् ॥ २५ ॥

रुद्रान्तं रुद्रतुर्यं चान्तं कूटाक्षरेण युक्।
बिन्दुनादसमायुक्तं कूटाङ्गमिदमीरितम् ॥ २६ ॥

एवं कूटाङ्गमित्युक्तं विद्याङ्गानि ततः शृणु।
*प्रकारं तु समुद्धृत्य तकारं तु समुद्धरेत् ॥ २७ ॥

नकारं पूर्वकं शस्तं हकारन्तु समुद्धरेत्।
दकारोपेतरंकारं यकारं च नमोन्तकम् ॥ २८ ॥

एवं विद्याङ्गमाख्यातं प्रकारं च समुद्धरेत्।*
(नकारं चैव वाकारं यकारं च नमोन्तकम् ॥ २९ ॥

एवं विद्याङ्गमाख्यातं तकारेण मकारयुक्।)
नमोन्तं तु समुद्धृत्य स्वाहान्तं शिरसा विदुः ॥ ३० ॥

शिकारं चैव वाकारं प (फ) ट् च हुंकारमेव च।
वषट्कारसमायुक्तं शिखाबीजमुदाहृतम् ॥ ३१ ॥

शिकारं चैव वाकारं तकारेण मकारयुक्।
तकारं च मकारं च हकारं च समुद्धरेत् ॥ ३२ ॥

तकारं च ज (म) कारं च अनुस्वारं च सर्वतः।
जकारे झ (तु) समायुक्तं मकारं च फ (प) कारकम् ॥ ३३ ॥

(र) नकारं च शिकारं च मकारं च समुद्धरेत्।
आ (अ) कारं च व (य) कारं च त (र) कारं च मकारयुक् ॥ 34

वह्निशेखरसंयुक्तं यकारं तु मकारयुक्।
ऐकारं च क (स) कारं च अनुस्वारसमायुतम् ॥ ३५ ॥

अ (क) कारं च मकारं च फट्कारं च शिकारकम्।
अनुस्वारसमायुक्तं ग (ल) कारं च लकारकम् ॥ ३६ ॥

मकारं च ह (भ) कारं च मकारेण समुच्चयम्।
अकारं चैव वाकारं हकारं च मकारकम् ॥ ३७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

शिकारं च लकारं च मकारं हारमेव च ।
क्षकारं च उ (ज) कारं च क (अ) कारं च व (वि) कारकम् ॥
नकारेण समायुक्तं वन्धशब्दसुदाहृतम् ।
पूर्वं (र्णं) चैव तु पूर्वं (र्णं) च कहाकहसमायुतम् ॥ ३९ ॥
गि (क) रि द्वन्द्वसमायुक्तं सूक्ष्मसूक्ष्मसमायुतम् ।
ई (र) कारं च द (ज) कारं च शि (ति) कारेकारमेव च ॥
फ (च) कारं च मकारं च इ (उ) कारं च पकारकम् ।
विकारं च शकारं च शफट् चैव हुकारकम् ॥ ४१ ॥
फट्कारस्तंभकश्चैव स्तंभशब्दं तथैव च ।
यंकारं चैव ऊ (हुँ) कारं फट्कारेण समायुतम्
एवं कवचमाख्यातं सर्वरक्षाकरं भवेत् ॥ ४२ ॥
[प्रकारं च स्फुकारं च रकारं प्रस्फुकारकम् ।
रकारं चैव विन्यस्य घोरं चैव तु घोरकम् ।
तकारं च नुकारं च रूकारं च पकारकम् ॥ ४३ ॥
चटश्चैव चटश्चैव प्रचटः प्रचटस्तता ।
कहश्चैव कहश्चैव वमश्चैव वमस्तथा ॥ ४४ ॥
पूतयश्चैव हुंफट्च(फट्कारश्च)स्वहाकारसमायुतम्]
शिवास्त्रं पशुपत्यस्त्रं ब्रह्मास्त्रं क्षुरिकास्त्रकम् ॥ ४५ ॥
व्योमास्त्रमित्यघोरास्त्रमेतद्विद्यांगमीरितम् ।
शिवास्त्रमंत्रोद्धारं च प्रवक्ष्ये श्रृणु षण्मुख ॥ ४६ ॥
ओंकारं प्रथमं बीजं शिकारं च द्वितीयकम् ।
तृतीयबीजं वाकारं स्त्राकारं च चतुर्थकम् ॥ ४७ ॥

पंचमं तु थकारं स्यात् षष्ठं फट्कारमेव च ।
शिवास्त्रमंत्रष्षड्वर्णः सर्वसिद्धिप्रदायकः ॥ ४८ ॥
शिवास्त्रमंत्रस्संप्रोक्तः श्रृणु पाशुपतं मनुम् ।
ओंकारं प्रथमं बीजं श्लींकारं च द्वितीयकम् ॥ ४९ ॥
पकारं स्यात्तृतीयं तु शुकारं च चतुर्थकम् ।
हुंकारं पंचमं बीजं फट्कारं षष्ठबीजकम् ॥ ५० ॥
एष पाशुपतास्त्राख्य मंत्रःषड्वर्णको भवेत् ।
प्रोक्तं पाशुपतास्त्रं हि ब्रह्मास्त्रं च ततः श्रृणु ॥ ५१ ॥
ओंकारं प्रथमं बीजं ब्रकारं तु द्वितीयकम् ।
ह्माकारं स्यात् तृतीयं तु स्त्राकारं तु चतुर्थकम् ॥ ५२ ॥
यकारं पंचमं बीजं षष्ठं फट्कारकं भवेत् ।
अयं ब्रह्मास्त्रमंत्रश्च षड्वर्णश्शुभदो भवेत् ॥ ५३ ॥
ब्रह्मास्त्रमंत्रस्संप्रोक्तः क्षुरिकास्त्रमथ श्रृणु ।
छिकारं प्रथमं बीजं छिकारं तु द्वितीयकम् ॥ ५४ ॥
क्षुकारः स्यात् तृतीयं च रिकारं च चतुर्थकत् ।
काकारं पंचमं बीजं स्त्राकारं षष्ठवर्णकम् ॥ ५५ ॥
यकारं सप्तमं बीजं फट्कारं चाष्टमं भवेत् ।
क्षुरिकास्त्रमनुश्चाष्टवर्णोऽयं स्याद्वरप्रदः ॥ ५६ ॥
क्षुरिकास्त्रमनुः प्रोक्तः व्योमास्त्रं च ततः श्रृणु ।
ओंकारं प्रथमं बीजं मांकारं च द्वितीयकम् ॥ ५७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयवीजं मींकारं सर्वकारणकारणम् ।
चतुर्थवीजं मूँकारं व्योकारं पंचमं भवेत् ॥ ५८ ॥
षष्ठवर्णं मकारं च व्याकारं सप्तमं भवेत् ।
पिकारमष्टमं वीजं नेकारं नवमं स्मृतम् ॥ ५९ ॥
ओंकारं दशमं बीजं व्योमास्त्रं तु दशार्णकम् ।
व्योमास्त्रमंत्रस्संप्रोक्तश्चाघोरास्त्रमथ श्रुणु ॥ ६० ॥
प्रकारं च स्फुकारं च रकारं प्रस्फुकारकम् ।
रकारं चैव विन्यस्य घोरं चैव तु घोरकम् ॥ ६१ ॥
तकारं चैव विन्यस्य(र)मकारं चैव विन्यसेत् ।
अतःपरं तकारं च रकारं च तकारकम् ॥ ६२ ॥
तकारं च नुकारं च रूकारं च पकारकम् ।
चटश्चैव चटश्चैव प्रचतः प्रचटस्तथा ।
कहश्चैव कहश्चैव वमश्चैव वमस्तथा ॥ ६३ ॥
घातय घातय ब्रूयात्ततो हुंफट् समायुतम् ।
स्वहाश्चैव समायुक्तं मन्त्रं हेतिरुदाहृतम् ॥ ६४ ॥
*प्रकारं च स्फुकारं च रकारं च स्फुकारकम् ।
रकारं चैव विन्यस्य घोरं चैवतु घोरकम् ॥ ६५ ॥
तकारं चैव विन्यस्य मकारं चैव विन्यसेत् ।
तकारं च नुकारं च रकारं च पकारकम् ॥ ६६ ॥
पूतयश्चैव हुंफट् च स्वाहाकारसमायुतम् ।
स्वरेणैव तु संयुक्तं मन्त्रभेदमुदाहृतम्* ॥ ६७ ॥

एवं विद्याङ्गमाख्यातं शक्त्यङ्गानि ततः श्रुणु ।
आधारशक्तिबीजं च बिन्दुनादसमन्वितम् ॥ ६८ ॥
प्रथमं शक्तिबीजं स्यात् सामिती बीजमित्यपि ।
प्रथमं बीजमित्युक्तं द्वितीयं बीजमुच्यते ॥ ६९ ॥
पीताभयुक् शक्तिबीजं विन्दुनादसमायुतम् ।
द्वितीयं वीजमित्युक्तं तृतीयं वीजमुच्यते ॥ ७० ॥
ऊकारयुक् शक्तिबीजं विन्दुनादसमन्वितम् ।
तृतीयं बीजमित्युक्तं ऐकारं शक्तिसंयुतम् ॥ ७१ ॥
*शक्तयर्णं वाग्भवोपेतं कार्यकारणसंयुतम् ।
चतुर्थं बीजमित्युक्तं पंचमं बीजमुच्यते ॥ ७२ ॥
शक्तिश्चतुर्दशोपेतं शिवशक्तिसमायुतम् ।
पंचमं वीजमित्युक्तं षष्ठं बीजमथोच्यते ॥ ७३ ॥
स्वरान्तं शक्तिसंयुक्तं व्रर्णं चैव तु संयुतम् ।
एवं शक्त्यङ्गमाख्यातं सामान्याङ्गमथोच्यते ॥ ७४ ॥
आदिवर्गौश्विनौ वेदरसौभानुमनू तथा ।
षोडशार्णं षडेते च सामान्याङ्गमितीर्यते ॥ ७५ ॥
ब्रह्मविष्णुसुरेन्द्राश्च आदित्येन्दुगुहास्तथा ।
मदनक्षेत्रविघ्नेशाश्चाष्टमूर्तिर्वसुस्तथा ॥ ७६ ॥
विघेशाश्च गणेशाश्च लोकपालायुधास्तथा ।
सिद्धविद्याधराश्चैव गन्धर्वाप्सरसस्तथा ॥ ७७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

यक्षकिन्नरभूताश्च ऋषयः खेचरास्तथा ।
अन्येषां सर्वदेवानां स्वनामाद्यक्षरं तथा ॥ ७८ ॥

*सामान्येषु समायोगाद्बिन्दुनादसमन्वितम् ।
तेषामङ्गानि चोक्तानि मूलं तद्बीजमुच्यते ॥ ७९ ॥

सामान्याङ्गमिदं प्रोक्तं तेषां वर्णमथोच्यते ।
हृदयं शुक्लवर्णं स्यात्पीतवर्णं शिरस्तथा ॥ ८० ॥

शिखां रक्तसमां विद्यात्कवचं स्फटिकप्रभम् ।
नेत्रं श्यामनिभं विद्यात्कृष्णाभं चास्त्रमुच्यते ॥ ८१ ॥

एवं शिवाङ्गमाख्यातं भूताङ्गानि तथोच्यते ।
पीतं शुक्लनिभं रक्तं कृष्णं धूम्रं च पावकम् ॥ ८२ ॥

भूताङ्गानां च वर्णानि समासात्कीर्तितानि तु ।
श्वेतं रक्तं तथा नीलं कुंकुमं पीतमंजनम् ।
कूटाङ्गानां तु वर्णानि समासात्परिकीर्तितम् ॥ ८३ ॥

जपाकुसुमकुन्दाभं पावकं चेन्द्रनीलकम् ।
सिंदूरं हरितालं च विद्याङ्गानां निभस्तथा ॥ ८४ ॥

पीतं श्यामं तथा रक्तं कृष्णं मरकतं तथा ।
एतैरेव सवर्णानि शक्त्यङ्गानां क्रमाणि तु ॥ ८५ ॥

स्फाटिकं रक्तपीतं च श्यामाङ्गं कांचनारुणम् ।
एतान्युक्तानि वर्णानि सामान्यांगमुदीरितम् ॥ ८६ ॥

चतुर्भुजं त्रिनेत्रं च जटामकुटमण्डितम् ।
सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ॥ ८७ ॥

त्रिशूलमभयं सव्ये कपालं वरमन्यके ।
हारकेयूरसंयुक्तं कटकैः कुण्डलैर्युतम् ॥ ८८ ॥

हृदादि वर्मपर्यन्तं स्वरूपं सौम्यमुच्यते ।
शेषा रौद्रा इति ज्ञेयास्सर्वेषां रूपमुच्यते ॥ ८९ ॥

शिवाङ्गैस्तु यजेद्देवं स्थापनादीनि सर्वशः ।
भूतांगेषु च षड्वक्त्र पादादेर्भूतशोधनम् ॥ ९० ॥

अणौ नामानि संयोज्य भूतांगेषु समाचरेत् ।
कूटांगैश्चैव विद्याङ्गैः प्रायश्चित्तं तु कारयेत् ॥ ९१ ॥

शक्तीनां स्थापने काले शक्त्यङ्गैस्तु समाचरेत् ।
अन्येषां सर्वदेवानां सामान्याङ्गैस्तु योजयेत् ॥ ९२ ॥

एवं षडङ्गमाख्यातं विशेषमधुनोच्यते ।
केवलं ज्ञानजं चैव योगजं भूतजं तथा ॥ ९३ ॥

कामदं च क्रमेणैव हृदयं पञ्चधा भवेत् ।
शिवाङ्गं हृदयं यत्तु केवलं समुदाहृतम् ॥ ९४ ॥

सान्तं यान्तसमायुक्तं मादिवर्गान्तसंयुतम् ।
ज्ञानात्महृदयं बिन्दु समासात्परिकीर्तितम् ॥ ९५ ॥

भूतान्तमनिलोपेतं तत्वान्तं स्वरसंयुतम् ।
शिवशक्तिसमोपेतं योगजं हृदयं विदुः ॥ ९६ ॥

पंचमं पार्थिवोपेतं द्वितीयं स्वरसंयुतम् ।
बिन्दुनादसमायुक्तं भूतजं हृदयं विदुः ॥ ९७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

तत्वान्तमनिलान्तं च दशांतांतकलान्वितम् ।
बिन्दुनादसमायुक्तं हृदयं सर्वकामदम् ॥ ९८ ॥
हृदयादि नमोन्तं तु सर्वेषां सह योजयेत् ।
ईशानं प्रथमं विद्याच्छुक्लवर्णमुदाहृतम् ॥ ९९ ॥
ईश्वरं ज्ञानहृदयं तप्तकांचनसन्निभम् ।
योगजं ब्रह्मरूपं स्यात्पीतवर्णं तु निर्दिशेत् ॥ १०० ॥
भूतजं चेश्वरं रूपं रक्तवर्णमुदाहृतम् ।
सादाख्यं कामदं विद्यात् शुद्धस्फटिकसन्निभम् ॥ १०१ ॥
यजनं केवलेनैव स्थापनं ज्ञानजेन तु ।
प्रोक्षणं योगजेनैव दीक्षाकर्म तु भूतजम् ॥ १०२ ॥
सर्वकर्मविशेषेण कामदेनैव कारयेत् ।
एवं हृदयमाख्यातमस्त्रभेदमथ शृणु ॥ १०३ ॥
शिवास्त्रं क्षुरिकास्त्रं च तथा पाशुपतास्त्रकम् ।
व्योमास्त्रं चैव घोरास्त्रं अस्त्रं पंचविधं भवेत् ॥ १०४ ॥
षडक्षरं शिवास्त्रं स्यात्क्षुरिकात्वष्टवर्णकम् ।
पाशुपतं तु पंचार्णं व्योमास्त्रं तु दशार्णकम् ॥ १०५ ॥
चत्वारिंशदघोरास्त्रं एवं पंचास्त्रमुच्यते ।
सर्वकर्मार्हकं विद्यात् पूजकः सर्वकर्मसु ॥ १०६ ॥
शिवाङ्गानि षडङ्गानि कीर्तितानि षडानन ।
अङ्गभेदमिति ख्यातं मन्त्रजातमथ शृणु ॥ १०७ ॥

इति श्रीवातुलोत्तरतन्त्रे शुद्धाख्ये सहस्रग्रन्थसंहितायां
अङ्गभेदो नाम
॥ अष्टमः पटलः ॥

॥ अथ मन्त्रजातपटलः ॥

ब्रह्माविष्णुसुरेन्द्रचन्द्ररविभिः सद्भूतिमद्भिः परैः
देवाद्यैः परमन्त्रविद्भिरपरैः सद्भक्तिमद्भिर्नृभिः ।
सद्भिः सत्पथवर्त्मभिर्मनुमुनिव्रातैरुपास्यं महत्
श्रीलिङ्गं शिवतत्वमुख्यनिलयं हृद्यं प्रपद्ये धिया ॥

अथातस्संप्रवक्ष्यामि मन्त्रजातमथ शृणु ।
मन्त्राणि जायते यस्मात् मन्त्रजातमिति स्मृतम् ॥ १ ॥
तस्मान्मन्त्रमयं लिङ्गं वक्ष्ये संक्षेपतः शृणु ।
सर्वलोकहितार्थाय सर्वप्राणिहिताय च ॥ २ ॥
सर्वमन्त्रप्रसिध्यर्थं भुक्तिमुक्त्यर्थमुच्यते ।
शालिपिष्टाकसूत्रेण सूत्रपातमथाचरेत् ॥ ३ ॥
गोमयालेपिते क्षेत्रे निम्नोन्नतविवर्जिते ।
प्राक् पश्चिमाः षोडश स्युः प्रागुत्तरमुखास्तथा ॥ ४ ॥
पंक्तयः षोडश स्युस्ताः प्राङ्मुखाश्चोत्तरामुखाः ।
षट्पञ्चाशत्समाधिक्य कोष्ठानि द्विशतानि च ॥ ५ ॥
पश्चिमादींद्रपर्यन्तं लिङ्गार्थं वीथिकां त्यजेत् ।
पश्चाच्चत्वारि चत्वारि वीथ्यः कोष्ठानि मध्यमे ॥ ६ ॥
संरक्ष्य पार्श्वद्वितयोः षट्षट् कोष्ठानि लोपयेत् ।
तदूर्ध्वपङ्क्तिं संरक्ष्य तदूर्ध्वे द्वादश क्षिपेत् ॥ ७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

पार्श्वयोरुभयोस्तत्र द्वे द्वे कोष्ठानि लोपयेत् ।
तदूर्ध्वे दशकोष्ठानि रक्षेत्पार्श्वत्रयं त्यजेत् ॥ ८ ॥

ततः षट्कोष्ठकं रक्ष्य पार्श्वयोः पंच पंच च ।
लोपयेच्च तदूर्ध्वे तु रक्ष्य चत्वारि पार्श्वयोः ॥ ९ ॥

*षट्कोष्ठानि च संत्यज्य तदूर्ध्वे तद्वदाचरेत् ।
तदूर्ध्वपङ्क्तिद्वितये चतुष्कोष्ठानि रक्षयेत् ॥ १० ॥

पार्श्वयोश्च द्वयोः षष्ठकोष्ठानि च परित्यजेत् ।*
ततः षट्कोष्ठकं रक्ष्य पार्श्वयोः पंचलोपयेत् ॥ ११ ॥

तदूर्ध्वे दश संरक्ष्य पार्श्वयोस्त्रि त्रि लोपयेत् ।
तदूर्ध्वे द्वादशं रक्षेत् द्वे द्वे पार्श्वे च लोपयेत् ॥ १२ ॥

तदूर्ध्वपङ्क्तिं संरक्ष्य ततो लिङ्गं द्विपङ्क्तितः ।
पङ्क्त्योश्चत्वारि चत्वारि कोष्ठान्यूर्ध्वं च रक्षयेत् ॥ १३ ॥

*पार्श्वयोरुभयोश्चैव षट्कोष्ठानि परित्यजेत् ।
एवं लिङ्गं समासाद्य ब्रह्मविष्णवीशपीठकम् ॥ १४ ॥

एता (का) सर्वान्तरा शक्तिः करोति विविधं जगत् ।
आस्थाय ब्रह्मणो रूपं मन्मयीत्यवधिष्ठिता ॥ १५ ॥

अन्या च शक्तिर्विपुला संस्थापयति मे जगत् ।
भूत्वा नारायणोनन्तो जगन्नाथो जगन्मयः ॥ १६ ॥

तृतीया महती शक्तिः निहन्ति सकलं जगत् ।
तामसी मे समाख्याता कालाख्या रुद्ररूपिणी ॥ १७ ॥

षट्टिका कंज (कर्ण) कंठाब्ज पट्टिकाज्यप्रधारिकाः ।
षडङ्गानि च पीठस्य क्रमात्प्रोक्तानि षण्मुख ॥ १८ ॥

मन्त्रन्यासक्रमं लिङ्गे श्रुणु वत्स समासतः ।
अङ्गभेदषडङ्गानि प्रोक्तमन्त्राणि विन्यसेत् ॥ १९ ॥

हृदयं पट्टिकायां तु शिरः कंजे शिखां गले ।
कवचं कमले नेत्रं पट्यामस्त्रं च धारिके ॥ २० ॥

प्रोक्तं षडङ्गविन्यासं वक्ष्याम्याधारषट्क्रमात् ।
कंजस्य चाध आधारं वादि सान्तं चतुर्दळे ॥ २१ ॥

स्वाधिष्ठाने च षट्पत्रे वा (वा) दिलान्तं ततो न्यसेत् ।
ततो मणौ दशदळे डादिफान्तं ततो न्यसेत् ॥ २२ ॥

हृदये द्वादशदळे कादिठान्तं प्रविन्यसेत् ।
पट्यां (कंठे) कर्णे षोडशके आदिवर्गं न्यसेत्ततः ॥ २३ ॥

आज्ञायां द्विदळे चोर्ध्वे हक्षयुग्मं न्यसेत्ततः ।
*इत्येकपंचाशद्वर्णा रुद्रबीजानि मुख्यतः ॥ २४ ॥

एतानि शिवचक्राणि शक्तिचक्राण्यथोच्यते ।
न्यसेत्पूर्णोदरी च स्याद्विरजा शाल्मली तथा ॥ २५ ॥

लोलाक्षी वर्तुलाक्षी च दीर्घघोणा समीरिता ।
शुभीमुखी गोमुखी स्याद्दीर्घजिह्वा तथैव च ॥ २६ ॥

कुण्डोदर्यूर्ध्वकेशी च तथा विकृतमुख्यपि ।
ज्वालामुखी तथा ज्ञेया पश्चादुल्कामुखी तथा ॥ २७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सश्रीमुखी च विद्या च मुख्यास्तावरशक्त्ययः ।
महाकाळीसरस्वत्यौ सर्वसिद्धिसमन्विते ॥ २८ ॥

गौरी त्रैलोक्य विद्या च मन्त्रशक्तिस्ततः परं ।
आत्मशक्तिर्भूतमाता तथा लम्बोदरी तथा ॥ २९ ॥

द्राविणी नागरी भूयः खेचरी चापि मंजरी ।
रूपिणी विरजा पश्चात् कालोदर्यपि पूतना ॥ ३० ॥*

*स्याद्भद्रकाळीयोगीन्यौ शंखिनी गर्जनी तथा ।
काळरात्रिः खुर्दनी च कपर्दिन्यपि वाङ्मयी ॥ ३१ ॥

जया च सुमुखीश्वर्यौ रेवती माधवी तथा ।
वारुणी वायवी प्रोक्ता पश्चाद्रक्षोविदारिणी ॥ ३२ ॥

ततश्च सहजा लक्ष्मीर्व्यापिनी माययान्विता ।
एता रुद्राङ्ग (पीठस्थाः) पिण्डस्थाः सिन्दूरारुणविग्रहाः ॥

रक्तोत्पलकपालाभ्यामलंकृतकराम्बुजाः ।*
आधारादि गळान्तं च न्यसेद्वर्णानि पूर्ववत् ॥ ३४ ॥

आज्ञायां तु विशेषेण शक्तिपक्षे (ह) क्षळं न्यसेत् ।
वर्णादि देवतास्तत्र पूर्ववत्परिकल्पयेत् ॥ ३५ ॥

एवं पट्चक्रमाख्यातं मूर्तिमन्त्रं प्रविन्यसेत् ।
नादं लिङ्गे च विन्यस्य विन्दुमाज्यप्रसा (घा) रिके ॥ ३६ ॥

पट्यादिकंजपर्यन्तं मकारं विन्यसेत्क्रमात् ।
वृत्ते उकारं विन्यस्य अकारं कंजपट्टिके ॥ ३७ ॥

सूक्ष्मपंचाक्षरं प्रोक्तं स्थूलपंचाक्षरं श्रुणु ।
नकारादि यकारान्तं पंचार्णं तत्र विन्यसेत् ॥ ३८ ॥

पंचाक्षरमिदं प्रोक्तं षडक्षरमथोच्यते ।
तारं लिङ्गे प्रविन्यस्य पट्टिकायां नकारकम् ॥ ३९ ॥

मकारमूर्ध्वकंजे तु शिकारं वृत्तमध्यगे ।
अधःकंजे वकारं च अधःपट्यां यकारकम् ॥ ४० ॥

यान्तं भान्तं च वान्तं च तृतीयस्वरभूषितम् ।
लान्तं पक्षस्वरोपेतं मान्तं पंचाक्षरं स्मृतम् ॥ ४१ ॥

हृदयं च परं सूक्ष्मं लान्तोऽनन्तान्वितो मरुत् ।
पंचाक्षरमनुप्रोक्तं ताराद्योऽयं षडक्षरम् ॥ ४२ ॥

एवं षडक्षरं प्रोक्तं षडध्वन्यास उच्यते ।
जगत्यां भुवनाध्वानं पदाध्वानं च पंकजे ॥ ४३ ॥

वर्णाध्वानं च वृत्ते तु कलाध्वानं च पंकजे ।
तत्वाध्वानं पट्टिकायां मन्त्राध्वानं प्रसा (घा) रिके ॥ ४४ ॥

एवं षडध्वनो न्यस्य सर्वमन्त्रात्मकं शिवम् ।
सप्तकोटिमहामन्त्रैर्मन्त्रितं लिङ्गमुच्यते ॥ ४५ ॥

ज्ञात्वा समर्चयेन्मन्त्रं त्वन्यथा निष्फलं भवेत् ।
कामिकादिषु तंत्रेषुह्यष्टाविंशतिभेदतः ॥ ४६ ॥

प्रोक्तानि मन्त्रजातानि तत्सर्वं विन्यसेद्बुधः ।
तस्मात्सर्वप्रयत्नेन मन्त्रजातमिदं मतम् ॥ ४७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

अतिवालं सवालं च कौमारं च त्रिकोणकम् ।
यौवनं चैव जातीनां प्रकृतिर्विकृतिस्तु वा ॥ ४८ ॥

ब्राह्मणः क्षत्रियो वैश्यः शूद्रजातिरनंतरम् ।
स्त्रीपुंनपुंसकं चैव शयन (चलन) स्थानमासनम् ॥ ४९ ॥

शुद्धं मिश्रं च संकीर्णं मन्त्ररूपमथ श्रुणु ।
(एकोनविंशतिर्मन्त्रास्तेषां लक्षणमुच्यते) ॥ ५० ॥

शुद्धं चाकारसंयुक्तमतिबालमिति स्मृतम् ।
अष्टबीजसमायुक्तं सबालमिति कीर्तितम् ॥ ५१ ॥

पंचाक्षरसमायुक्तं कौमारं तु कीर्तितम् ।
यौवनं चैव सर्वेषां मन्त्रजातं प्रकीर्तितम् ॥ ५२ ॥

एकाक्षरं ब्राह्मणं स्यात् क्षत्रं पंचाक्षरं भवेत् ।
षडक्षरसमायुक्तं वैश्यं शूद्रं प्रकीर्तितम् ॥ ५३ ॥

एवं क्रमेण गुणितं चतुर्थ्यन्तं प्रकीर्तितम् ।
स्वाहाकारो भवेन्नारी नमोन्तं पुरुषाकृतिः ॥ ५४ ॥

फट्कारं च वषट्कारं नृपुंसकमिति स्मृतम् ।
विप्रं स्वाहान्तकं प्रोक्तं नृपवैश्यादिसंयुतम् ॥ ५५ ॥

शूद्राणां तु नमश्चैव मंत्रजातं प्रकीर्तितम् ।
इन्द्रादिशयनस्थानमासनं मन्त्रपीठकम् ॥ ५६ ॥

शुद्धमेकाक्षरं प्रोक्तं वेदवर्णाश्च मिश्रकाः ।
संकीर्णो बहुवर्णश्च त्रिविधो मन्त्रईरितः ॥ ५७ ॥

मन्त्रादौ शीर्षकं प्रोक्तं मन्त्रोर्ध्वे वदनं मतम् ।
मन्त्रबाह्ये तु बाहू च तस्याप्याधारसंयुतम् ॥ ५८ ॥

पार्श्वे तु चक्षुः श्रोत्रं च चक्षुर्मध्ये तु नासिका ।
तस्योर्ध्वे तु ललाटं च बिन्दुर्मस्तकमीरितम् ॥ ५९ ॥

नादं जिह्वा समाख्यातं शब्दं शब्दमिति स्मृतम् ।
ओष्ठं शब्देन भिन्नं स्यात् अस्याधारसमन्वितम् ॥ ६० ॥

वाग्भवं मुखमित्याहुः ओष्ठान्तं कण्ठ एव च ।
पार्श्वे च रूपमेवं तु वासवाहनमुच्यते ॥ ६१ ॥

[अकारं च इकारं च उकारं च ऋकारकम् ।
लृकारं चैव एकारं ओकारं च तथैव च ॥ ६२ ॥

एते सप्तस्वरादीनि मंत्रप्रकृतिरुच्यते ।
सर्वमीकारसंयुक्तमतिबालं प्रकीर्तितम् ॥ ६३ ॥

अष्टबीजसमायुक्तं स बालं चेति कीर्तितम् ।
पंचस्वरसमायुक्तं कौमारं तु प्रकीर्तितम् ॥ ६४ ॥

यौवनं चैव सर्वेषां मन्त्रजातं प्रकीर्तितम् ।
शिवाक्षरं ब्राह्मणानां पंचाक्षरं नृपस्य तु ॥ ६५ ॥

षडक्षरसमायुक्तं वैश्यादीनां प्रकीर्तितम् ।
एवं क्रमेण गुणितं चतुर्थ्यंतं प्रकीर्तितम् ॥ ६६ ॥

स्वाहाकारो भवेन्नारी नमोंतं पुरुषाकृतिः ।
फट्कारं च वषट्कारं नपुंसकमिति स्मृतम् ॥ ६७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

विप्रस्स्वाहांतकं प्रोक्तं नृपवैश्यादिसंयुतम् ।
शूद्राणां तु नमश्चैव मंत्रजातं प्रकीर्तितम् ॥ ६८ ॥

शुद्धमेकाक्षरं मंत्रं वेदाक्षरं तु मिश्रकम् ।
संकीर्णं बहुधा मंत्रं त्रिविधं मंत्रमुच्यते ॥ ६९ ॥

एवं नवदशं जातं मन्त्रजातमथ शृणु ।
मंत्रादौ शीर्षकं प्रोक्तं मंत्रोर्ध्वं वदनं परं ॥ ७० ॥

मंत्रपार्श्वे तु बाहू च तस्याऽधः स्थानसंयुतम् ।
चक्षुः पार्श्वे तु श्रोत्राणि चक्षुर्मध्ये तु नासिका ॥ ७१ ॥

तस्या ऊर्ध्वे ललाटं च विंदुर्मस्तक उच्यते ।
नादं जिह्वयमाख्यातं शब्दं शब्दमिति स्मृतम् ॥ ७२ ॥

ओष्ठशब्देन भिन्नस्य आस्यांतरसमन्वितम् ।
प्रणवांते समायुक्तं मंत्रांतेच प्रतिष्ठितम् ॥ ७३ ॥

मंत्ररूपमिदं प्रोक्तं मन्त्रवासं तथोच्यते ।
प्रणवांते समायुक्तं मंत्रांते च प्रतिष्ठितम् ॥ ७४ ॥

मंत्रासनमिदं प्रोक्तमथवाहनमुच्यते ।
मंत्राणां प्रकृतिर्वासः वाहनं विकृतिस्ततः ॥ ७५ ॥

प्रकृतिर्वर्णभावं च वर्णानां वासजिह्वया ।
(जिह्वास्ये तु वासं च आस्यानां बुद्धवासनम्) ? ॥ ७६ ॥

नित्यो नैमित्तिकश्चैव परंचाऽपरमेव च ।
सच्चासच्च सुरश्रेष्ठ कर्तृ भर्तृ तथैव च ॥ ७७ ॥

हृद्यं नैव तथाऽहृद्यमद्य ह्यःश्वस्तथैव च ।
वाच्यं च वाचकं यत्तदाधाराधेयमेव च ॥ ७८ ॥

सुस्थितं (दु) सुस्थितं चैव चलं चाऽचलमेव च ।
शीतमुष्णं च यत्प्रोक्तं सुखं दुःखं तथैव च ॥ ७९ ॥

पवित्रं चाऽपवित्रं च मृदु तीक्ष्णं तथैव च ।
रागद्वेषं च यत् ज्ञानं यच्चालभ्यं तथैव च ॥ ८० ॥

उन्नतं चानतं चैव संपच्चासंपदेव च ।
सर्वमेतच्च देवेशास्तस्मादन्यन्न विद्यते ॥ ८१ ॥

प्रकृतिश्शब्दमात्रं तु रूपमात्रं तथापरम् ।
रसमात्रं गंधमात्रं श्रोत्रत्वक् चक्षुरेव च ॥ ८२ ॥

जिह्वा घ्राणं च वाक्पाणि पादं पायुरुपस्थकम् ।
मनसा च पृथिव्यादिपंचकं पुरुषेण तु ॥ ८३ ॥

रागमायां च विद्यां च कला नियममेव च ।
विग्रहेशं च शक्तिं च शुद्धमायां तथैव च ॥ ८४ ॥

शुद्धविद्या शुद्धकला सदाशिव शिवं विदुः ।
ईश्वरं च स एव स्यात्सएवाऽहं भवांस्तथा ॥ ८५ ॥

स एव देवब्रह्मादि कार्यपाद्यप्रजाः सृजाः ।
स एव मुनयस्सप्त चंद्रादित्यौ ग्रहेश्वरौ ॥ ८६ ॥

स एव देवराजोपि कुबेरो वरुणस्तथा ।
समयोऽग्निश्च नागेशो निर्ऋतिर्वायुरेव च ॥ ८७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

ईशानो गणपास्सर्वे वसवोऽष्टौ तथैव च।
रुद्रा एकादशान्येऽपि देवदानवपुंगवाः ॥ ८८ ॥

दैवमष्टविकल्पं च धैर्यमन्योन्यपंचकम्।
मानुष्यं च जगत् कृत्स्नं स एव शिव उच्यते ॥ ८९ ॥

चत्वारश्च तथा वेदा रहस्ये न वदंति कम्।
सिद्धांते भूततंत्रे च वामे स्रोतसि दक्षिणे ॥ ९० ॥

भैरवेषु तथान्येषु पशु पाशुपतादिषु।
विष्णुतंत्रे च बौद्धे च तथा दिक्पतिदर्शने ॥ ९१ ॥

अष्टादशपुराणेषु षडंगेषु परेषु च।
योगशास्त्रेषु सर्वेषु न्यायवैशेषिकादिषु ॥ ९२ ॥

यैर्यैर्यद्यत्परिक्रम्यं तत्सर्वं प्रोच्यते बुधैः।
तत्तत्स एव देवेशः शिवशास्त्रे सनातनः ॥ ९३ ॥

आदिमध्यांतनिर्मुक्तस्वभावविमलप्रभुः।
सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयश्शिवागमे ॥ ९४ ॥

केवलाद्यनवच्छिन्नो वामे नोदितगोचरे।
निष्कळो (सकळो) निष्कळश्चाऽपि सर्वगंधर्वदिक्सदा ॥९५॥

अंतर्यागो हि तत्पूजा योगिनामेव सा भवेत्।
योगाभ्यासरतैस्सद्भिः हृत्कुशेशयमध्यमे ॥ ९६ ॥

यमाद्यष्टांगयोगेन विमलीकृतमानसे।
पूज्यते नेतरैस्तस्य पूजा कर्तुं विशिष्यते ॥ ९७ ॥

हित्वा तदर्चनादन्यत् श्रेयोभवति देहिनाम्।
अंतर्यागाधिकारोऽत्र क्वचित्कस्याऽपि जायते ॥ ९८ ॥

बहिर्यागाधिकारोऽयं किंचित् ज्ञानं च जायते।
इत्यवेत्य स देवेशश्शिवस्सर्वांतरस्थितः ॥ ९९ ॥

लोकाऽनुग्राहको भूत्वा जंतूनां भुक्तिमुक्तिदः।
पंचब्रह्मतनुः साक्षात्सशिवोऽभूत्सदाशिवः ॥ १०० ॥

तस्मादीश्वर उत्पन्नस्सर्वं देवादिरव्ययः।
ततो हि मत्तस्सर्वज्ञस्समुत्पन्नो जगद्गुरुः ॥ १०१ ॥

तन्नाभिकमलोद्भूतो ह्यजो लोऽकपितामहः।
अधिश्रिता भवेद्विद्या सैव मायेति कीर्तिता ॥ १०२ ॥

मूलप्रकृतिरित्येषा साऽपि पंचसु मुक्तिषु।
कार्यकारणभावेन स्थितस्तस्य स्थितं शृणु ॥ १०३ ॥

तस्या मनोन्मनी देवी सदाशिवसमाश्रिता।
मंत्ररूपमिति प्रोक्तं मंत्रवासनमुच्यते] ॥ १०४ ॥

मंत्राणां विकृतिर्वासः वाहनं विकृतिः स्मृतम्।
प्रकृतिर्वर्णभावश्च वर्णवासो रसज्ञकः ॥ १०५ ॥

तस्यां वरं च वासं चास्यार्णे बुद्धिवासनम्।
बुद्ध्यर्णे हृदये वासं हृदयं पिंडवासनम् ॥ १०६ ॥

पिंडार्णे वासयेत् नाड्याः नाडीनां वायुवासयेत्।
वायुवासं च शक्तीनां शक्तिवासं च वै शिवः ॥ १०७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

शिववासं च सर्वेषां मंत्रवासं प्रकीर्तितम् ।
मंत्रवासमिदं प्रोक्तं मंत्रवाहनमुच्यते ॥ १०८ ॥

लिंगे च प्रतिमे कुंभे वास्तौ वह्नौ च मूलके ।
अन्येकुंभे च वास्तौ च युक्तं मंत्रस्य वाहनम् ॥ १०९ ॥

एवं नवदशं प्रोक्तं मंत्रजातस्य लक्षणम् ।
मंत्रजातमिदं प्रोक्तं मंत्रकीलं ततः शृणु ॥ ११० ॥

इति श्रीवातुलोत्तरतन्त्रे शुद्धाख्ये सहस्रग्रन्थसंहितायां
मंत्रजातं नाम
॥ नवमः पटलः ॥

॥ अथ मन्त्रकीलपटलः ॥

सकलभुवनभूतभावनाभ्यां-
जननविनाशविहीनविग्रहाभ्याम् ।
नरवरयुवतीवपुर्धराभ्यां-
सततमहं प्रणतोऽस्मि शंकराभ्याम् ॥

अथातस्संप्रवक्ष्यामि मन्त्रकीलमथ शृणु ।
आकारं कीलमित्युक्तं कीलमन्त्रं विसर्जयेत् ॥ १ ॥

नेत्रे ललाटे चक्षुश्च श्रोत्रं नासिकमास्यकम् ।
कण्ठं बाहू च देहे च मन्त्रमुच्चार्यते बुधैः ॥ २ ॥

अतिदीर्घायते वृत्तमथ दीर्घाश्च वृत्तकम् ।
अर्धचन्द्रसमाकारं नादमायान्तनादवत् ॥ ३ ॥

एवमादिस्तु मन्त्राणां सर्वदुःखविनाशनम् ।
भुक्तिमुक्तिप्रदं चैव सर्वकामार्थसाधनम् ॥ ४ ॥

विपरीतो विपत्त्यै स्यान्मन्त्ररूपं प्रकीर्तितम् ।
गुरौ लिंगेऽक्षमालायां मन्त्रेभस्मनि पंचसु ॥ ५ ॥

एतासु शिवमुद्रासु शिवभक्तिं समाचरेत् ।
आत्मीयान् विविधान् भोगान् स्त्रीपुत्रप्रमुखानपि ॥ ६ ॥

स्वात्मानं चित्तवुद्धी च तेषां च वशमानयेत् ।
यो भेदं शक्तिमान् भक्तास्तेषु मोहात्करोति सः ॥ ७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

शिवद्रोहीति विज्ञेयः सर्वकर्मबहिष्कृतः ।
शैवं चतुर्विधं ज्ञेयं समासात् श्रुणु षण्मुख ॥ ८ ॥

सामान्यं मिश्रकं चैव शुद्धं वीरं यथाक्रमम् ।
तत्रादौ संप्रवक्ष्यामि शैवसामान्यलक्षणम् ॥ ९ ॥

शिवलिंगं यथा पश्येत् तथा कुर्यात्समर्चनम् ।
प्रदक्षिणं प्रणामं च दर्शनं चाऽत्र कारयेत् ॥ १० ॥

भस्मधारणमात्रेण शुद्धो भवति सर्वदा ।
शिवकीर्तिस्तदालापे प्रीतिमान् शिवभक्तके ॥ ११ ॥

एतेषां नियतिर्नास्ति यथालब्धं समाचरेत् ।
सामान्यलक्षणं प्रोक्तं वक्ष्ये मिश्रस्य लक्षणम् ॥ १२ ॥

शैवं च वैष्णवं शाक्तं कौमारं गाणपत्यकम् ।
सौरं चाऽखिलदैवत्यं पूजनं च समाचरेत् ॥ १३ ॥

एतेषूक्तेषु सर्वेषु तत्तन्मन्त्रेषु मिश्रितान् ।
सम्यक् भक्तिसमायुक्तः सर्वान् लिंगेन भावयेत् ॥ १४ ॥

मिश्रशैवमिति प्रोक्तं शुद्धशैवमथ श्रुणु ।
शुद्धत्वाच्छिवमुद्दिष्टं शिवाज्जातं हि शैवकम् ॥ १५ ॥

शुद्धशैवसमायोगात् शुद्धं शिवमिति स्मृतम् ।
शिवेनोत्पद्यते शैवस्तस्माज्जातश्शिवद्विजः ॥ १६ ॥

कौशिकः काश्यपश्चैव भारद्वाजोऽत्रिरेव च (ऽथ गोतमः) ।
गौतमश्चेति (अगस्त्यश्चैव) पंचैते पंचवक्त्रेषु दीक्षिताः ॥१७॥

कामिकादिषु तन्त्रेषु चाष्टाविंशतिषु क्रमात् ।
वेदशास्त्रादिविद्यासु कृत्वाऽभ्यासं शिवं प्रति ॥ १८ ॥

कर्षणादिप्रतिष्ठांतं प्रतिष्ठाद्युत्सवांतकम् ।
उत्सवादि प्रायश्चित्तांतं ज्ञात्वा सर्वं समाचरेत् ? ॥ १९ ॥

मन्त्रयन्त्रक्रियामुद्रान्यासावाहनकादिभिः ।
उपचारैर्बहुविधैः लिंगं सिंहासने यजेत् ॥ २० ॥

आत्मार्थं च परार्थं च पूजा द्विविधमुच्यते ।
दत्ते च गुरुणा लिंगे स्थंडिले स्वयमात्मनि ॥ २१ ॥

आत्मार्थमिदमाख्यातं परार्थं तु ततः श्रुणु ।
ग्रामादौ स्थापिते लिंगे यद्वा देवादि निर्मिते ॥ २२ ॥

परार्थमिति विज्ञेयं सर्वप्राणिहितावहम् ।
शुद्ध (आदि) शैवेन कर्तव्या द्विधापूजेति चोदिता ॥ २३ ॥

अन्येषां स्वार्थयजनं न कुर्यात्तु परार्थकम् ।
मोहाल्लोभाश्च कुर्वीत राज्ञो राष्ट्रस्य दुःस्थितिः ॥ २४ ॥

शैवावरण देवांश्च सर्वान् संपूजयेत् क्रमात् ।
पृथ्विस्थानस्थितास्सर्वा नार्चयेदन्य देवताः ॥ २५ ॥

मन्त्रपिंडहृदंभोजे वासमन्त्रस्य भावनाः ।
आवाहनात्समायोगे लिंगे पूजादिकं चरेत् ॥ २६ ॥

मन्त्रलिंगशरीरस्य स एव परमः शिवः ।
शुद्धशैवमिदं प्रोक्तं वीरशैवमथ श्रुणु ॥ २७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सर्वेषामपि शैवानां वीरशैवं महत्तरम् ।
सुलभं देवपूजायां सुलभं च क्रियास्वपि ॥ २८ ॥

ज्ञानगम्यं रहस्यं च कैवल्यपदकारणम् ।
वीरशैवमिति ज्ञेयं तेषां लक्षणमुच्यते ॥ २९ ॥

एवमेकायने यस्मात् सर्वस्मिन् जगदीश्वर ।
विशिष्टं वीयते यस्माद्वीर इत्यभिधीयते ॥ ३० ॥

शिवेन सह संबंधं चैव माद्दत्य तं बुधैः ।
वीरशैवसमायोगात् वीरशैवमिति स्मृतम् ॥ ३१ ॥

वीरमाहेश्वरं तन्त्रं ज्ञातव्यं विविधं स्मृतम् ।
सामान्यं च विशेषं च निराभारं क्रमाद्भवेत् ॥ ३३ ॥

तत्रादौ संप्रवक्ष्यामि वीरसामान्यलक्षणम् ।
हस्तमस्तकसंयोगात् भूतिपट्टस्य धारणात् ॥ ३४ ॥

शिवदेहीति विज्ञेयः सर्वपापैः प्रमुच्यते ।
गुरुणा दत्तलिंगं तु शिवमन्त्रेण धारयेत् ॥ ३५ ॥

मूर्ध्नि कंठे भुजे हस्ते हृत्स्थले नाभिमंडले ।
एतेषामेकदेशे तु धारयेच्छिवलिंगकम् ॥ ३६ ॥

एककालं द्विकालं च त्रिकालं वा समर्चयेत् ।
गुरौ लिंगे सदा भक्तिं कारयेद्व्रसितव्रती ॥ ३७ ॥

वीरसामान्यमाख्यातं विशेषं शृणु षण्मुख ।
शिवकुंभं समासाद्य स्थंडिलादिषु पूर्ववत् ॥ ३८ ॥

शिवकुंभे शिवं पूज्य भक्तानन्नेन तोषयेत् ।
शेषं दीक्षोक्तवत् कृत्वा मलपाशादिमोचनम् ॥ ३९ ॥

गुरुः शिष्यं समालोक्य तत्वदेहं विचिंतयेत् ।
शिवकुंभस्थतोयेन अभिषिंचेच्छिवाणुना ॥ ४० ॥

नादबिंदुकलादीनि तत्तत्स्थानेषु विन्यसेत् ।
षट् चक्रं च षडंगं च षडध्वानं षडानन ॥ ४१ ॥

तत्तत् स्थानेषु विन्यस्य पंचब्रह्म न्यसेत्ततः ।
मूलमंत्रोपदेशेन ततोलिंगं प्रदापयेत् ॥ ४२ ॥

शेषाणि सर्वकर्माणि विध्युक्तक्रममाचरेत् ।
देहे प्राणं समायोज्य प्राणं लिंगे प्रकल्पयेत् ॥ ४३ ॥

अविनाभावसंयोगात्तस्मादैक्यं प्रकल्पयेत् ।
अन्यदृष्टिनिपातं यत्तद्द्रव्यं परिवर्जयेत् ॥ ४४ ॥

शुद्धद्रव्यं समासाद्य लिंगानां च समर्पणम् ।
इति व्रतसमायुक्तः वीरशैवो विशिष्यते ॥ ४५ ॥

विशेष शैवमाख्यातं निराधारं ततः शृणु ।
सर्वसंहारसौख्यानि त्यक्त्वा चित्तं शिवेऽर्पयेत् ॥ ४६ ॥

दंडकौपीनकाषायजटावल्कलधारकः ।
मुंडी वा शिवचिह्नानि धारयेदजिनादिकम् ॥ ४७ ॥

भिक्षाशी नियताहारस्सुखसंसारवर्जितः ।
निराहारेति विज्ञेयः स्थूलवृत्तोत्तमः शिवः ॥ ४८ ॥

In Public domain. Digitization Muthulakshmi Research Academy

वीरमाहेश्वराणां च सामान्यव्रतमुच्यते ।
पूर्वोक्तशिवमुद्रासु तत्त्वादिषु च सर्वतः ॥ ४९ ॥

अर्थतः प्राणतः प्राज्ञः भक्तिं कुर्याद्दृढं सुत ।
पापं तेषु न वक्तव्यं स्वयमेव कदाचन ॥ ५० ॥

कृते परेण चेत्पापे नेक्षेत करणैस्त्रिभिः ।
बलवान् रक्षयेत्तत्र दुर्बलश्चेत् व्रजेत्ततः ॥ ५१ ॥

करणैस्तु विहीनश्चेत् बुद्धिं तत्र विनिक्षिपेत् ।
स्वीकरोति यदा लिंगं गुरुणा दीक्षयाऽणुना ॥ ५२ ॥

तदाप्रभृति लिंगैक्यं अविनाभावयोगतः ।
देहं प्राणेन संस्थाप्य प्राणं लिंगेन निक्षिपेत् ॥ ५३ ॥

प्राणेन निक्षिपेल्लिंगं पृथग्भावं न कारयेत् ।
वीरशैवक्रमः प्रोक्तः प्रायश्चित्तविवर्जितः ॥ ५४ ॥

(प्राणलिंगी व्रते लुप्ते हस्तखड्गादवंचयन् ।
मुखं पंकजवच्छिद्यात् वीरभृत्यस्य लक्षणम्) ॥ ५५ ॥

यो वा चोत्पाटयेज्जिह्वां शिवनिंदाकरस्य तु ।
त्रिस्सप्तकुलमुद्धृत्य रुद्रलोकं स गच्छति ॥ ५६ ॥

शिवनिंदा कर्तृशिक्षा प्रायश्चित्त विवर्जितः ? ।
शुद्ध शैवो विशेषेण मन्त्रयन्त्रप्रचारणात् ॥ ५७ ॥

शुद्धो भवति लोकेषु प्रायश्चितविधानतः ।
व्रतस्य तु क्रियालोपे नियमस्य विलोपने ॥ ५८ ॥

गायत्र्याष्टशतेनैव विशुद्धिमधिगच्छति ।
सामान्यं मिश्रकं चैव शुद्धं वीरं चतुर्विधम् ॥ ५९ ॥

तत्सर्वं हि समासेन तव प्रोक्तं षडानन ।
तत्वादि कीलकांतानां पटलानां दशक्रमात् ॥ ६० ॥

एवं शुद्धाख्यतन्त्रन्तु कथितं तव सुव्रत ।
भुक्तिमुक्तिप्रदं नृणां सर्वकामार्थसाधनम् ॥ ६१ ॥

इति श्रीवातूलोत्तरतंत्रे शुद्धाख्ये आगमरहस्ये
सदाशिवषण्मुखसंवादे सहस्रग्रन्थसंहितायां
मन्त्रकीलो नाम
॥ दशमः पटलः ॥

॥ श्रीसाम्बसदाशिवार्पणमस्तु ॥

In Public domain. Digitization Muthulakshmi Research Academy

—: पाठान्तरम् :—

पुट संख्या	श्लोकसंख्या	मुद्रितपाठः	पाठान्तरम्
६	४६	तद्रूपं सूक्ष्मरूपेण	प्रसादं सूक्ष्मरूपंतु
८	६८ श्लोकानन्तरं ६९ श्लोकात् पूर्वं	——	लयादि भेदः प्रागुक्तो यद्रूपादौ शिवस्य तु । स बिंदुरितिमंतव्यो शैवकुंडलिनी मता ॥
९	७८	पंचतत्वात्मकं ज्ञेयं सर्वाधारं समाश्रितम्	सर्वतत्वात्मकं ज्ञेयं तत्वाधारं समाश्रितम् ।
,,	७९	एतद्वै मूर्तिपिंडत्वात् पिंडकायमितिस्मृतम्	एतद्वै कर्मसादाख्यं पिंडरूपमिहोच्यते ।
,,	८०	८० श्लोकस्य पूर्वार्धोत्तरार्धयोर्मध्ये—	अतीतकालमूर्तिपिण्डं रूपं कुम्भे व्यवस्थितम् ॥
,,	,,	धातु बंधगुणात्मकम्	धातु शब्दगुणात्मकम्
१४	१३२॥	विंशति....तदनन्तरम् ।	विंशोऽथ विघ्नप्रासादः सोमास्कंदस्ततःपरम् । द्वाविंशश्चैकपादस्तु त्रयोविंशस्सुखावहः ॥
२०	२८	क्षकारकम्	हकारकम्
२२	५४	पकारं पर्जबीजं स्यात् शुक्लाभं	पर्जन्यबीजं शुक्लाभं पकारं
२८	२५श्लोकानन्तरं	प्रत्यूषश्च........ । गंधपुष्पादिभिश्चैव.... । (अनयोर्मध्ये—	—अयं दृश्यते) प्रत्यूषश्च........ । तत्पत्रे मुकुळाकारे वास्तुदेवान्प्रपूजयेत् । गंधपुष्पा-

In Public domain. Digitization Muthulakshmi Research Academy

पुट संख्या	श्लोकसंख्या	मुद्रितपाठः	पाठान्तरम्
२८			दिभिश्चैव.... । इति]
,,	३३	क्षंचवै	भंचवै
३४	४१	एते प्रथमवर्गस्यत्वेतत् नामप्रकीर्तिताः ।	एतानि चाष्टवर्गस्य नामान्येवं स्मृतानि च ।
३७	२५	स्वाश्रितानामनारतम्	स्वाश्रितानां मनोरथम्
४०	५६	ईशाख्यं	ईशाद्यं
४९	१८	बृहतिरिष्यते	बृहतीछन्द ईरितः
,,	२०	छन्दो जगतिरुच्यते ।	जगतीछन्द ईरितः
,,	२५	प्रणवभेदमिदं प्रोक्तं ब्रह्मभेदमिदं श्रुणु ॥	उक्तः प्रणवभेदश्च ब्रह्म-भेदमथ श्रुणु ॥
५१	१३	हकारेष्वनुक्रमात्	हकारेषु तथा क्रमात्
५२	२२+२३	महादेवाय धीमहि तन्नोचेति द्वितीयकम् ॥ रुद्रस्तृतीयमित्युक्तं चतुर्थं तु प्रचोदयात् ।	महादेवाय धीमहि द्वितीयः परिकीर्तितः ॥ तन्नो रुद्रस्तृतीयस्या-च्चतुर्थस्तु प्रचोदयात् ।
५३	सार्ऽर्ध २९ श्लोकानन्तरं -सार्ऽर्ध ३१ श्लोकपर्य-न्तम्-		द्वितीयं पदमित्युक्तं सद्योजाताय वै नमः । तृतीयं स्याद्भवेचैवाभवे स्याच्च चतुर्थकः । स्यात्पञ्चमो नातिभवे ततः षष्ठो भजस्वमाम् ॥ भवेति सप्तमश्चस्याद्‌भवाय नमोऽष्टमः ।

पुट संख्या	श्लोकसंख्या	मुद्रितपाठः	पाठान्तरम्
५३	३६	सद्यादीनां च	सद्योजातादि
८४	३३	निराभारं	निराधारं
८५	४६	निराधारं	निराभारं
८६	५३-५४	निक्षिपेत्	योजयेत्
८७	६१	एवं........सुव्रत ।	शैवं शुद्धाख्य तन्त्रस्य कथितं तव सुव्रत ।

मन्त्रकीलपटलस्य मंगळश्लोकोऽयं ग्रन्थान्तरं उपलब्धः

ज्ञात्वा त्रिंशदतीतमेकममितं शैवं महातत्वकम् ।
तद्भेदं बहुलीलया च सहितं नानावतारान्वितम् ॥

सामान्यादिसमस्तशैवनिवहं वीरं च शैवं महत् ।
संश्रित्यात्मनि दिव्यलिंगमनिशं ध्यायंस्तदीशं भजे ॥

In Public domain. Digitization Muthulakshmi Research Academy

पुट सख्या	श्लोकसंख्या	अशुद्धम्	शुद्धम्
८	७३	लिंशेषेण	विशेषेण
१४	१३१	एकोनविंशति स्मृतम्	ऐकोनविंशतिस्स्मृतम्
,,	१३३	भवेश्च	भवेच्च
१५	१३८	चोद्भवः	कोद्भवः
,,	१३९	देवाश्च सम्भवाः	देवादि सम्भवः
१६	१४४	उमायाश्च	द्युमायाश्च
,,	१४६	सपूजा	स पूजा
,,	११ पङ्क्तौ	तत्वमेदंनाम	तत्वमेदोनाम
१७	२	क्षकारान्तमेक	क्षकारन्ता एक
,,	७	नादन्ते शक्तिं जादते	नादाच्छक्तिरजायत
१८	९	एतत्सृष्टिकमं प्रोक्तं तेषां	एवं सृष्टिक्रमः प्रोक्त-स्ततो
,,	१२	अकारश्च इकारश्च उका-रश्च ऋकारकम्	अकारश्च तथेकार उका-रश्च ऋकारकः
,,	१३	ऌकारं चैव एकारं तथैवौकारमेवच	ऌकारश्च तथैकारस्तथै-वोकार एवच
,,	१४	शेषास्तु विकृतिः प्रोक्ताः तेषामुद्भवमुच्यते। अकारेचोद्भवाकारं-	शेषा विकृतयः प्रोक्तास्ता सामुद्भव उच्यते। अकारेऽजायताकार-
१९	२५	स्वरवर्णानि	स्वरवर्णाश्च
२०	,,	रसेभानु	रसाभानु

पुट संख्या	श्लोकसंख्या	अशुद्धम्	शुद्धम्
२०	३२	ऋकारादीनि वर्णानि तेषामग्निरिति स्मृतः	ऋकारादि त्रयोवर्णा वैश्वानर इति स्मृताः
,,	३३	प्रभवं विकलाः प्रोक्ताः इत्येवं त्रिविधा भवेत्॥	प्रभवो विकलः प्रोक्त इत्येवं त्रिविधं स्मृतम्॥
,,	३४	प्रकृतिर्ह्रस्वमित्युक्तं विकृतिर्दीर्घमुच्यते।	प्रकृतिर्ह्रस्व इत्युक्तो विकृतिर्दीर्घ उच्यते।
२१	४०	शिखण्डी	शिखण्डि
२२	५२	घर्मणो	धर्मिणो
२३	५८	पृथ्वितत्वं स्यात्	पृथिवी तत्वं
,,	६१	तु	च
२४	७२	तस्माद्वर्णानि	तस्माद्बीजानि
,,	७४	वर्णानि	बीजानि
२७	१८	लेख्या	लेख्यं
३०	४	वर्ग इत्युक्तं	वर्गमित्युक्तं
,,	५	,,	,,
३२	१८	वर्णकम्	वर्गकम्
३७	२५	संज्ञकम्	संज्ञकः
४०	४८	शिववाज	शिवबीज
४५	१००	मेवं	एवं
,,	१०३	प्रकृतिं मूर्तिं	प्रकृतिर्मूर्ति
४७	मंगळश्लोक	यामिनः	यमिनः
४८	११	शाम्भवः	शाम्भवं

In Public domain. Digitization Muthulakshmi Research Academy

पुट संख्या	श्लोकसंख्या	अशुद्धम्	शुद्धम्
४९	१८	विश्वामित्रः	विश्वामित्रो
५०	१	ब्रह्ममित्यभिधीयते	ब्रह्मेति परिकीर्तितम्
५१	१७	कला ब्रह्ममुदाहृतम्	कलाब्रह्म प्रकीर्तितम्
५२	२१	एते	एता
,,	२२	परिवक्ष्यते	परिकीर्तितम्
,,	,,	तन्नो चेति	तन्नश्चेति
,,	२५	सर्वतः पंचमं विद्यात् षष्ठं सर्वमुदाहृतम्।	पंचमस्सर्वतस्सर्वे शर्वेभ्यष्षष्ठ उच्यते ।
५३	३३	कलाब्रह्ममिति	कला ब्रह्म तथा
,,	३४	मूर्त्यादि कलन्तानां	मूर्त्यादि च कलान्तानां
५४	४३	सर्वाभरणसंयुतम् (पूर्वार्ध)	चतुर्दोर्भिस्समावृतम्
५६	५९	ईशानां	ईशानं
,,	,,	समान्वितम्	समन्वितम्
,,	६६	पंचवर्णाः	पंचवर्णं
५७	७५	तु अष्ट	तु ह्यष्ट
,,	७६	ब्रह्मणि	ब्रह्माणि
६०	१९	मूषितम्	भूषितम्
६७	९५	युक्तं मादि	युक्तमादि
७२	२८	मुख्यास्तावरशक्ययः	मुख्या स्ता वरशक्तयः
८१	मंगळश्लोक	नखर	नरवर

पुट संख्या	श्लोकसंख्या	अशुद्धम्	शुद्धम्
८१	२	नेत्रे..............बुधैः ॥	नेत्रे ललटो वक्षश्च(चक्षुश्च) श्रोत्रे चास्यं च नासिका। पादौ (कण्ठो) बाहू च देहश्च (देहेवै) मन्त्र उच्चार्यते बुधैः ॥३॥
८२	१७	(गोतमः)	(गौतमः)
८३	२५	पृथ्विस्थान	पृथ्वी स्थाने स्थिताः
८४	३६	थारयेत्	धारयेत्
८५	४८	निराहारेति	निरा भारीति

सूचना

१) *...........* / [ ] / ( ) — इति चिह्नत्रयान्तर्गतश्लोकाः ग्रन्थान्तरेषूपलब्धाः उपयुक्ततया तत्र तत्र संघटिताः ।

सर्वत्र श्रुणु श्रृणु इति मन्तव्यम्

२) मन्त्रभेदपटले ४२-४३ तमे पुटे ७०॥ श्लोकादारभ्य ८१ श्लोकपर्यन्तं मुद्रिताः श्लोकाः उपरि निर्दिष्ट चिह्नरहिता अपि ग्रन्थान्तरादुपलब्धं पाठान्तरमित्यवधेयम् ॥

In Public domain. Digitization Muthulakshmi Research Academy